सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskṛta Academy

**Recognised in the UGC-CARE List**

**A National Peer-Reviewed Research Journal**

विश्वविद्यालय-अनुदान-आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**Volume : XVIII**

**July to December - 2021**

*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**

Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XVIII : July to December – 2021

# क्रियायाः स्वरूपविमर्शः

डा. पि. आर्. अर्चना कारन्त्
अतिथि-उपन्यासिका, व्याकरणविभागः,
कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु

शब्दसाधुत्वप्रतिपादनपराणामाकरग्रन्थानां समीक्ष्यमाणे सति श्रेष्ठस्य मुख्यवेदाङ्गत्वेन प्राप्तप्रतिष्ठस्य शब्दानुशासनस्य प्रमुखतः स्वरूपद्वयं समुपलभ्यते । एकं लौकिक-वैदिकोभयविधशब्दव्युत्पादकं प्रक्रियात्मकम्, अपरं परमार्थवस्तुप्रतिपादकं प्रमेयात्मकम् । नैतादृशी गतिर्भवति शास्त्रान्तरस्य पक्षद्वयाश्रयात्मिका । एतद्वाराद्वयमपि निर्बाधगत्या प्रवहमाणं दृश्यते । तत्र प्रमेयाख्यं पन्थानं समाश्रित्येयं विचारसरणिः प्रवर्त्स्यते ।

"वाक्यस्फोट एव मुख्यः, अतिनिष्कर्षः, लोके अर्थबोधकः, तेनैवार्थ-समाप्तिश्च । किन्तु प्रतिवाक्यं सङ्केतग्रहासम्भवात् वाक्यान्वाख्यानस्य लघुनोपायेन कर्तुमशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान् प्रविभज्य कल्पिताभ्यामन्वय-व्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं कुर्वन्ति स्म आचार्याः" इति परमलघुमञ्जूषायां नागेशभट्टाः । शास्त्रप्रक्रिया-निर्वाहाय कल्पिता या प्रकृतिः सा द्विविधा - धातुः, प्रातिपदिकञ्चेति ।

धातुश्च भूवादिः शुद्धः, प्रत्ययान्तश्चेति सङ्कीर्णः । शुद्धस्य "भूवादयो धातवः" इत्यनेन धातुरिति संज्ञा, सङ्कीर्णस्य तु "सनाद्यन्ता धातवः" इत्यनेन । सनादयश्च सन्-क्यच्-काम्यच्-क्यङ् क्यष् प्रभृतयः द्वादश । उभयविधस्यास्य धातोः फलं-व्यापारश्चेति अर्थः । तयोरुभयोरपि क्रियेति व्यपदेशः । तत्र व्यापारे, कारणं क्रियेति "कृञः श च" इति भावे शः, फले तु क्रियते निष्पाद्यते इति कर्मणीति विशेषः।

**'सर्वकारकान्वयितावच्छेदकधर्मवती-क्रिया'१** इति क्रियालक्षण- मवादि धीमता नागेशेन परमलघुमञ्जूषाख्ये ग्रन्थे । निखिलैः कर्तृ-कर्म-करण-संप्रदान-अपादान-अधिकरणादिभिः कारकैः सह या अन्वयिता, तया अवच्छिन्नो यो धर्मः

१)परमलघुमञ्जूषा, धात्वर्थप्रकरणम्

तद्वती या, सा क्रियेति लक्षणसमन्वयः । लक्षणेऽस्मिन्, सर्वेषामेव कारकाणां क्रियायामेवान्वयः इति स्फुटं बोधयितुं सर्वपदोपादानम् । अधिकरणस्यापि स्वाश्रयद्वारा क्रियान्वयः अस्त्येव । कारकत्वस्य क्रियाजनकत्वरूपतया जन्य-जनकयोः परस्परसाकांक्षत्वेन कारक-क्रिययोः परस्परान्वयः । कारकान्वयि-तावच्छेदकधर्मः फलत्वव्यापारत्वान्यतररूपः, तद्वतीयं क्रिया । अत्र क्रिया फल-व्यापारोभयात्मिका इति न व्यापारलक्षणेनास्य गतार्थत्वम् ।

**'कारकाणां प्रवृत्तिविशेषः क्रिया'२** इति क्रियायाः स्वरूपं प्राह भाष्यकारः । एषा प्रवृत्तिविशेषरूपा क्रिया सकलधात्वर्थनिष्ठा । यथा- 'पर्वतः अस्ति' इत्यत्र धातोः आत्मोपग्रहणरूपः प्रवृत्तिविशेषः अर्थः । 'देवदत्तः म्रियते' इत्यत्र आत्मपरित्यागरूपः प्रवृत्तिविशेषः । 'बालस्तिष्ठति' इत्यत्र गमननिरोधः प्रवृत्तिविशेषः । सर्वापि प्रवृत्तिः प्रवृत्त्यन्तरात् भिद्यत इति अस्त्येव सर्वस्याः क्रियात्वम् ।

तान्त्रिकास्तु क्रियायाः लक्षणमित्थमवादिषुः यत्-

**क्रियामन्ये तु मन्यन्ते क्वचिदप्यनपाश्रिताम् ।**
**साधनैकार्थकारित्वे प्रवृत्तिमनपायिनीम् ॥३**

साधनैः फलोत्पन्नरूपप्रयोजनकारित्वे, या अनपायिनी (नित्या) प्रवृत्तिः ईश्वरशक्तिः सा एव क्रिया । एवं च आत्मनः प्रवृत्तिरेव क्रिया । इयं क्रिया आत्ममात्रनिष्ठा, आत्मेतरद्रव्येषु तस्याः असम्भवात् । ननु साध्यत्वेन प्रतीयमानत्वं क्रियात्वमिति अग्रे वक्ष्यते । यदीयं क्रिया नित्या तदा सा, साध्यस्वभावयुक्ता कथं भवेदिति चेदाह-

**सामान्यभूता सा पूर्वं भागशः प्रविभज्यते ।**
**ततो व्यापाररूपेण साध्येव व्यवतिष्ठते ॥४**

आत्मनः प्रवृत्तिरूपा इयं क्रिया आदौ सामान्यरूपेण अवतिष्ठते । तदुत्तरं यदा साधनद्रव्याणि फलार्थोन्मुखानि भवन्ति तदेयं साधनरूपोपाधिभिः व्यापाररूपेण विपरिणम्य साध्यत्वरूपेण प्रतीयते ।

---

२) महाभाष्यम् १-३-१ । ३) वाक्यपदीयम्, क्रियासमुद्देशः श्लो.सं. ३६

४) वाक्यपदीयम्, क्रियासमुद्देशः, श्लो.सं. ३७

अतो नोक्तदोषः । सेयं क्रिया सर्वदापि साध्यस्वभावा । तदुक्तं वाक्यपदीये-

**यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ।**

**आश्रितक्रमरूपत्वात् सा क्रियेऽत्यभिधीयते ॥५**

सिद्धं-परिनिष्पन्नं, भूतम् (अपाक्षीत् इत्यादौ), असिद्धम्-अनिष्पन्नं (पचति-पक्ष्यतीत्यादौ) वा यावत् साध्यत्वेनाभिधीयते-साध्यम् इति प्रतीयते, सा-साध्यत्वेन प्रतीयमाना, आश्रितक्रमरूपत्वात्-गृहीतपौर्वापर्यत्वात् क्रिया इति निगद्यते । सर्वा अपि क्रिया लोके व्यापाराणां समुदायरूपेण प्रसिद्धा । यथा-आरोहणम्, अवरोहणम्, गमनागमनम्, पाकः इत्यादि। एवञ्च कर्त्रा क्रमेण क्रियमाणा एव क्रिया ।

सिद्धोऽप्यसिद्धोऽपि भावः यदा साध्यरूपेण कथ्यते तदा सा क्रियेति पूर्वमुक्तम् । तस्य हि भावस्य साध्यत्वेन, तत्र अवान्तरव्यापाराणां भवति कश्चन विशेषः क्रमः । यथा- पचतीत्यादौ अग्निप्रज्वालनादारभ्य अधिःश्रयणपर्यन्तः । यत्र तु नास्ति पौर्वापर्यक्रमः यथा- अस्तीत्यादौ तत्रापि अवयवभूत-व्यापारक्रमः आरोपणीयः । नन्वेवं सति पच् धातोः अनेकव्यापारसत्वे नानार्थतापत्तिः स्यादिति चेन्न त्यदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्वात् । यथा- त्यदादिशब्दानां घटत्व-पटत्वादिरूपेण नानार्थशक्ततया, तद्वारणाय स्वीयविषयतावच्छेदकसम्बन्धेन, वक्तृबुद्धिविशेषोपलक्षिताः ये घटत्व-पटत्वादयः धर्माः तदवच्छिन्ने त्यदादीनां शक्तिः स्वीक्रियते तद्वत् प्रकृतेऽपि विषयतावच्छेदकसम्बन्धेन वक्तृबुद्धिविशेषोपलक्षितेषु फूत्कारादिषु शक्तिः स्वीक्रियते । अतो नास्ति दोषः ।

नन्वेवमपि अवान्तरव्यापाराणां समुदाय एव क्रियेति स्वीकारे **'आख्यातेन एका क्रिया प्रत्याय्यते'** ६ इति प्रशंसायाम् इति सूत्रस्थभाष्यासङ्गतिः, **'न वै तिङन्तानि एकशेषारम्भं प्रयोजयन्ति'**७इति सरूपसूत्रस्थभाष्यासङ्गतिश्च इति चेदत्रोच्यते- धातौ क्रियैकत्वव्यवस्था च शक्यतावच्छेदकानां यः एकफलोत्पत्ति-रूपबुद्धिविशेषः, तस्य ऐक्यमादाय साध्यते ।

---

५) वाक्यपदीयम्, क्रियासमुद्देशः श्लो. सं. १ । ६) अष्टाध्यायी सूत्रम् ५-३-६६

७) अष्टाध्यायी सूत्रम् १-२-६४

सा च बुद्धिः फूत्कारादिविषयक-समूहालम्बनरूपा एकैव । तदाह हरिः-

**गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।**

**बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते ॥८**

गुणभूतैः स्वसमूहं प्रति गुणत्वमापन्नैः, अवयवैः समूहारम्भकैः फूत्कारत्वादिरूपेण भासमानवस्तुविशेषैः, क्रमजन्मनां-क्रमोत्पत्तिमतां, बुद्ध्या-सङ्कलनात्मकान्तःकरणवृत्त्या, प्रकल्पिताऽभेदः प्रतीतिविषयीकृतः अभेदः क्रियेति आचार्यैः व्यवह्रियते इति कारिकायाः संक्षेपार्थः । अत्र अवयवाश्रयं व्यापाराणां पौर्वापर्यम्, समुदायाश्रयं च एकत्वम् । व्यापारा हि क्षणनश्वरा इति तेषां वास्तविकसमुदायासम्भवात् अभेदरूपसमूहस्य बुद्धिप्रकल्पितत्वमुक्तम् । एषः बुद्धिप्रकल्पितसमूहो हि प्रधानः व्यापारः । तस्य अवयवभूताः अवान्तर- व्यापाराः गुणभूताः । अवयवानां क्रमेणोत्पत्त्या क्रियायाः आश्रितक्रमरूपत्वम् । तत्र एकैकावयवेऽपि समूहस्यारोपात् अधिःश्रयणकालेऽपि पचतीति व्यवहारः । तदुक्तं-

**एकदेशे समूहे वा व्यापाराणां पचादयः ।**

**स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः ॥९**

फलस्यापि स्वजनकव्यापारगत-पौर्वापर्यारोपेण क्रियात्वेनैव भानम् । अत एव कर्मकर्तरि 'पच्यते तण्डुलः स्वयमेव' इत्यादौ पच्यादेः फलमात्रार्थकत्वे धातुसंज्ञासिद्धिः, कारकाणां क्रियायामन्वयः इति नियमश्च संगच्छते । अन्यथा कर्मकारकस्य फलेनैवान्वयात् तदसङ्गतिः स्पष्टैव ।

साध्यत्वेनाभिधीयमानं क्रियेत्युक्तम् । तत्र साध्यत्वं किं स्वरूपमिति जिज्ञासायामाह **क्रियान्तराकांक्षाऽनुत्थापकतावच्छेदकरूपं-साध्यत्वम्१०** । अन्या क्रिया क्रियान्तरा । क्रियान्तरस्य आकाङ्क्षा क्रियान्तराकाङ्क्षा, अस्याः अन्वयिनी का क्रिया इत्येवं रूपा आकाङ्क्षेत्यर्थः । तस्याः अनुत्थापकत्वम्- अनुत्पादकत्वम्, एतादृशधर्मविशिष्टत्वं साध्यत्वम् । यथा-पचति, करोति इत्यादि तिङन्तस्थले किम्? कः? क्व? इत्यादि साधनाकाङ्क्षासत्वेऽपि अन्यक्रियाविषयिका आकाङ्क्षा नोदेति । पाकः-कृतिः इत्यादौ तु अस्ति-भविष्यति-नङ्क्ष्यति इत्यादि क्रियान्तरस्य

---

८) वाक्यपदीयम्, श्लो. सं. ४ । ९) वाक्यपदीयम्, साधनसमुद्देशः, श्लो. सं.५८

१०) भूषणसारः, धात्वर्थप्रकरणम्

आकाङ्क्षा जागर्ति । साध्यस्य हि स्वयमेव क्रियात्वम् । अतो न तस्याः क्रियान्तरापेक्षा जायते, कारकं हि तया सह अन्वेति । साध्यस्वभाव एव असत्त्वभूतमिति पदेन कथ्यते । सत्त्वं नाम द्रव्यम्, न सत्त्वम् असत्त्वम् । असत्त्वभूतत्वं नाम लिङ्गसंख्यान्वय-अयोगित्वम् । एतदेवादाय हरिराह- **'असत्त्वभूतो भावः तिङ्पदैरभिधीयते'**११इति ।

ननु हिरुगाद्यर्थस्य क्रियान्तराकांक्षादर्शनेन साध्यत्वाभावेऽपि साध्यात्मकक्रियावाचकत्वव्यवहारः अनुपपन्नः खलु इति चेदाह- हिरुगाद्यव्ययानां क्रियावाचकत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात् । अत एव हिरुगाद्यर्थै न कारकाणामन्वयः । एवमेव 'हरिं नमेत् चेत् सुखं यायात्' इत्यत्रापि चेत् शब्दसमभिव्याहारेण क्रियाकांक्षा, न तु स्वतः ।

वस्तुतस्तु पूर्वोक्तसाध्यलक्षणे अतिव्याप्तेः सम्भवात् **साध्यत्वं-निष्पाद्यत्वमेव**१२इत्यभिप्रैति नागेशभट्टः । साध्यत्वं यदि क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकं तर्हि 'पचति भवति' इत्यादि भाष्योक्तवाक्ये१३, 'भुक्त्वा गच्छति' इत्यादौ च भवति-भुक्त्वेत्यादीनां क्रियान्तराकाङ्क्षादर्शनेन कारकान्वयानापत्तिः धातुत्वानापत्तिश्च स्यात् । अतः साध्यत्वं-निष्पाद्यत्वमिति स्वीकार्यम् । ध्वनितं चेदं- "उपपदमतिङ्",१४ "सुट्कात् पूर्वः"१५ इत्यादौ भाष्ये । तत्र हि-'पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण । साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि । अभिनिर्वृत्तस्य च अर्थस्य उपसर्गेण विशेषः शक्यो वक्तुम्' इत्युक्तम् । तत्र 'साधनं हि क्रियां निर्वर्तयति' इत्यनेन धातुवाच्यक्रियायाः निष्पाद्यत्वरूपसाध्यत्वेन भानमिति स्पष्टमेवाभिहितम् । नन्वेवं साध्यत्वं निष्पाद्यत्वमिति स्वीकारे 'घटं करोति' इत्यादौ सिद्धस्यापि घटस्य साध्यत्वेन प्रतीतिः स्यादिति चेन्न- घटस्य साध्यत्वेन प्रतीतिस्तु करोति पदसान्निध्येन, न तु स्वतः । स्वतस्तु द्रव्यं सिद्धमेव भवति । इतः परं सिद्धक्रिया परिचाय्यते । असत्त्वभूतायाः क्रियायाः धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः स्यात् ।

---

११) अष्टाध्यायी सूत्रम् ३-१-६७ । १२) परमलघुमञ्जूषा, धात्वर्थप्रकरणम्

१३) महाभाष्यम् १-३-१ । १४) अष्टाध्यायी सूत्रम् २-२-१९

१५) अष्टाध्यायी सूत्रम् ६-१-१३५

न च इष्टापत्तिः, **'कृदाभिहितो भावः द्रव्यवत्प्रकाशते'**[१६] इति भाष्यविरोधापत्तेः । अतः पाकः इत्यादि कृदन्तस्थले प्रत्ययस्य सिद्धक्रियावाचकत्वमभ्युपेयम् । किं तस्य स्वरूपमिति जिज्ञासायामुच्यते- **"क्रियान्तराकांक्षोत्थापकतावच्छेदकवैजात्यवत्वे सति कारकत्वेन क्रियान्वयत्वे सति कारकान्तरान्वयायोग्यत्वम्"** सिद्धत्वम्[१७] । तच्च सिद्धत्वं पाकः इत्यादौ घञादि वाच्यम् । तदुक्तं हरिणा-

**'आख्यातशब्दे भागाभ्यां साध्य-साधनरूपता ।**
**प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥** [१८]

आख्याते इत्येव वक्तव्ये शब्दग्रहणं बहुव्रीहिलाभार्थम् । आख्यातं च आख्यातं च-आख्याते। आख्याते शब्दौ यस्मिन् तत्- आख्यातशब्दम् । तिङन्तशब्दद्वयघटितवाक्यमिति यावत् । यथा- 'पश्य मृगो धावति', 'पचति भवति' इत्यादयः । लोके यथा 'पश्य मृगोधावति' इत्यादौ भागाभ्यां साध्य-साधनवर्तिता प्रकल्पिता तथा इह शास्त्रेऽपि स क्रमः पाकः इत्यादि घञादिभावार्थकप्रत्ययस्थले प्रकल्पनीया इति कारिकायाः आशयः । अर्थात् प्रकृत्या क्रियायाः साध्यस्वभावः, प्रत्ययेन च सिद्धस्वभावः प्रतिपाद्यते इत्यर्थः । तथाहि- 'पश्य' इति तिङ्प्रकृत्यर्थदर्शनस्य साध्यरूपता । 'धावति' इत्यत्र प्रकृत्यर्थधावनस्य दर्शने कर्मत्वेनान्वयात् साधनरूपता । एवं पचति भवतीत्यत्रापि पचि क्रिया भवनक्रियायाः कर्त्री । उक्तं च भाष्ये- **'पच्यादयः क्रिया भवति क्रियायाः कर्त्र्यो भवन्ति'**[१९] इति । तद्वत् प्रकृतेऽपि ।

पाकः इत्यत्र पच् धातुना साध्यावस्था, घञ्प्रत्ययेन लिङ्गसंख्यान्वयत्वसाधनरूपता च उपस्थाप्यते । परं दृष्टान्त-दार्ष्टान्तिकयोः इयान् विशेषः यत्घञुपस्थाप्या क्रिया लिङ्गसंख्यान्वयिनी, कारकान्वयिनी च । आख्यातेनोपात्ता क्रिया तु नैवमुभयधर्मवती । तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्त-दार्ष्टान्तिकभावः । तथा च पाकः इत्यत्र घञ्प्रत्ययवाच्या क्रिया सिद्धावस्थापन्ना । तस्याः लिङ्गसंख्यान्वयत्वं, कारकान्वयत्वं च वर्तते । यथा पाकः, पाकौ, पाकाः इत्यादौ एकत्वादिसंख्यान्वयस्य, पाकं पश्य, पाकेन कृतम्, पाकात् बिभेति इत्यादौ

---

१६) अष्टाध्यायी सूत्रम् ३-१-६७ । १७) परमलघुमञ्जूषा, धात्वर्थप्रकरणम् ।
१८) वाक्यपदीयम्, क्रियासमुद्देशः, ४६ । १९) अष्टाध्यायी सूत्रम् १-३-१

कर्मत्वादिकारकान्वयस्य च भानम् ।

ननु कारिकायामुपात्तस्य भागाभ्यामित्यस्य प्रकृति-प्रत्ययाभ्यामित्यर्थः । तथा च पचतीत्यादौ पच् रूपप्रकृत्या, तिप् प्रत्ययेनेति भागद्वयेन यथा साध्य-साधनरूपता प्रतीयते तद्वत् पाकादिष्वपीति समन्वयः अभिप्रेत इति चेन्न, स घञादिष्वपीति उपमेयानुरोधात् क्रियायाः एव भागाभ्यां यथाक्रमं साध्यत्वेन-साधनत्वेन च भानमित्यर्थस्य विवक्षणात् ।

न च घञन्ते धातुनोपस्थाप्यमाना साध्यक्रियैवेत्यत्र मानाभाव इति वाच्यम्, 'ओदनस्य पाकः' इति कर्मषष्ठ्याः मानत्वात् । तथा हि 'पाकः' इति कृद्योगे ओदनरूपकर्मणः षष्ठी विधीयते "कर्तृकर्मणोः कृति"२० इति सूत्रेण । साध्यक्रियायामेव कारकाणामन्वय इति सिद्धान्तः । ततश्च ओदनरूपकर्मणः अन्वयाय कृत्प्रकृतिभूतधातोः साध्यक्रियावाचकत्वं अभ्युपेयमेव । यदि साध्यक्रिया न स्यात् तर्हि कर्मत्वादिकमप्यनुपपन्नं स्यात्, कर्मणि षष्ठी च न सिध्येत् । इत्थं च ओदनस्य पाकः इत्यादौ कर्मणि षष्ठ्याः विधानमेव घञन्ते धातोः साध्यस्वभावक्रियार्थकत्वे मानम् । ननु ओदनस्य पाकः इत्यादौ न धात्वर्थे कारकान्वयः, किन्तु भवतीति तिङन्तमध्याहृत्य तत्र ओदनादेरन्वयः क्रियते इति वाच्यम्, **कर्तृकर्मणोः कृतीति** कृद्योगे एव षष्ठ्याः विधानात् । किं च यदि तिङन्तस्याध्याहारः क्रियते तर्हि **न लोकाव्ययनिष्ठाखलर्थतृनाम् २१** इति सूत्रेण लादेशयोगे षष्ठीनिषेधप्रसङ्गश्च । ननु तत्र मा भूत् कृद्योगषष्ठी, शेषषष्ठ्यैव निर्वाहो अस्तु इति चेत् तदपि न, सर्वत्र सम्बन्धषष्ठ्यैव निर्वाहे कर्तृकर्मणोरिति विधिवैय्यर्थ्यापत्तेः । तस्मात् घञन्तस्थले धातुनोपस्थाप्या क्रिया साध्यक्रिया एवेति अभ्युपगन्तव्यम् । पूर्वोक्तविषयमेव स्पष्टयति-

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥२२**

पाकादिशब्दे साध्यत्वेन प्रतीयमाना क्रिया धातुरूपनिमित्तिका । तस्याः क्रियायाः यः सिद्धस्वभावः सः घञादिनिमित्तकः इति ।

---

२०) अष्टाध्यायी सूत्रम् २-३-६५ । २१) अष्टाध्यायी सूत्रम् २-३-६९

२२) वाक्यपदीयम्, क्रियासमुद्देशः, श्लो. सं. ४७

न च घञादिभिः सत्त्वभूतक्रियायाः अभिधाने मानाभाव इति वाच्यम्, पाकः भवति, पाकः अभवत्, पाकः भविष्यति, पाकः जायते, पाको नष्टः इत्यादि क्रियान्तरस्य आकाङ्क्षायाः दर्शनस्यैव मानत्वात् । धातूपस्थाप्यक्रियायां तु अन्यस्याः क्रियायाः आकाङ्क्षा-अदर्शनात् तत्र सिद्धक्रियात्वमसम्भव एव । 'स्तोकः पाकः' इत्यनापत्तिश्च । यदा प्रत्ययेन सिद्धक्रिया उच्यते तदैव 'स्तोकः' इत्यत्र प्रथमा सिध्यति । अन्यथा फलानां, फलविशेषणानां वा धातुप्रतिपाद्यक्रियाया-मेवान्वये' स्तोकादिभ्यः द्वितीयैव स्यात् **'क्रियाविशेषणानां कर्मत्वं क्लीबता च'**[२३] इति वचनात् । घञुपस्थाप्यसिद्धक्रियायामन्वये तु प्रत्ययानुसारं 'स्तोकः' इत्यत्र प्रथमाविभक्तिः पुल्लिङ्गता च सिध्यति ।

यद्वा एवमपि वक्तुं शक्यते यत्-पाकः इत्यत्र एका एव क्रिया प्रतीयते । परं प्रकृतिप्रत्यययोः पार्थक्यात् एकस्यां धर्मिणि धर्मद्वयं भासते । यथा पश्य मृगो धावतीत्यत्र धावनक्रिया मृगरूपसाधनापेक्षया साध्यस्वरूपा, दर्शनापेक्षया सिद्धस्वरूपा भवति तद्वत् पाकः इत्यत्रापि पाकक्रिया पच्धात्वपेक्षया साध्यतया, घञ्प्रत्ययापेक्षया साधनतया च प्रतीयते । न च एकस्यां धर्मिणि विरुद्ध-धर्मद्वयकथनमसङ्गतमिति वाच्यम्, निरूपकभेदाभ्युपगमात् । यथा "राज्ञः पुत्रस्य नप्ता विजयताम्" इत्यत्र पुत्रस्य राजापेक्षया प्राधान्यम्, नप्त्रपेक्षया अप्राधान्यम् । एवमेकस्मिन्नेव पुत्रे यथा राजन् शब्दार्थनिरूपितप्राधान्यं नप्तृशब्दार्थ-निरूपितमप्राधान्यमिति विरुद्धौ द्वौ धर्मौ निरूपकभेदात् भासेते तद्वत् पाकः इत्यत्रापि एकस्यामेव पाकक्रियायां साध्यत्व-सिद्धत्वेति विरुद्धधर्मौ विषयभेदात् (धातु-प्रत्ययेति) प्रतीयेते, अतो नास्ति दोषः इति शम् ।

## सन्दर्भग्रन्थाः

१. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकाडमी ।
२. महामहोपाध्यायनागेशभट्टविरचितः परमलघुमञ्जूषा, किरणावलीव्याख्यो-पेता, चौखम्बा संस्कृत प्रतिष्ठानम् ।

---

२३) सिद्धान्तकौमुदी, कारकप्रकरणम्

३. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योत समुलसितम्, चौखम्बा संस्कृत प्रतिष्ठानम् ।
४. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्बा संस्कृत प्रतिष्ठानम् ।
६. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी व्याख्याभ्यां समन्विता) मोतीलाल् बनारसीदास ।
७. नागेशभावप्रकाशसहिता लघुमञ्जूषा, व्याख्या-पेरी सूर्यनारायणशास्त्री ।
८. महामहोपाध्यायनागेशभट्टविरचितः लघुशब्देन्दुशेखरः, चौखम्बा संस्कृत प्रतिष्ठानम् ।
९. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द- संस्कृत-विश्वविद्यालयः ।

**Dr. P. R. Archana Karanth**
Guest Lecturer, Dept. Of Vyakarana
Karnataka Sanskrit University
Chamaraja Pete-560018,
Bengaluru, Karnataka
Ph no. – 9481904228
e-mail – archanakaranth6@gmail.com

•••••••••••

ISSN : 2278-8360

₹25

# संस्कृत - मंजरी

अन्ताराष्ट्रिया मूल्याङ्किता त्रैमासिकी शोधपत्रिका

An International Referred Quarterly Research Journal

वर्षम् १४ • अङ्कः २

( अक्टूबर २०१५ तः दिसम्बर २०१५ पर्यन्तम् )

सम्पादकः

डॉ० जीतराम भट्टः

# कृदभिहितो भावः

- पि.आर. अर्चना कारन्त्

भावो नाम धात्वर्थं इति तु निर्विवादम्। धात्वर्थश्च क्रिया। इह प्रकरणे विव्रियमाणः भावार्थः ईषदिव विभिन्नः। तत्रार्थे प्रमाणं य"भावे"[1] इति घञ्प्रत्ययविधायकं पाणिनीयं सूत्रम्। भावे अर्थे धातुसामान्यात् घञ्प्रत्ययः स्यादिति तस्यार्थः। पाकः, त्यागः, राग इत्यादीन्युदाहरणानि। ननु 'भावे' इति निर्देशः अनुपपन्नः। 'भावे' ति सूत्रेण भावार्थे घञ्प्रत्ययो भवति, घञि सति भावार्थः प्रतीयत इति अन्योन्याश्रयप्रसङ्गादिति चेन्न - शब्दानां नित्यत्वमाश्रित्य अन्योन्याश्रयपरिहारात्। उक्तं हि-

**नित्यानामेव शब्दानां साङ्कर्यस्य निवृत्तये।**
**अन्वाख्यानाद्भावशब्दे घञि नान्योऽन्यसंश्रयः॥ इति।**[2]

नित्याः शब्दाः, तेषु भावार्थबोधकानां शब्दानां तदितरेषां च यत् साङ्कर्यं प्रसक्तं तन्निरसनाय घञ्प्रत्ययः विधीयते, येन साङ्कर्यदोषः वार्यते।

ननु भावे इति भवतिना घञन्तेन शब्देन अर्थः निर्दिश्यते, ततश्च भवत्यर्थकानां अस्ति-भवति-विद्यते इत्यादीनां विषये एव प्रत्ययार्थनिर्देशेन भवितव्यम्। तथा च भवतेर्यो भावः तस्मिन् वाच्ये घञ्स्यादित्यार्थः स्यात्। ततश्च भूधातोः उत्पत्तिरूपः यः भावः तदर्थे घञि स एव भावः प्रतययेनाभिधीयत इति भूधातोरेव घञ् स्यात्, न तु पाकः, त्यागः इत्यादौ पचादीनां धातूनामिति चेदुच्यते - भवतिरिह कियासामान्यवाची, सर्वं धात्वर्थानुगतं क्रियासामान्यं भवतेरर्थः। तेन क्रियासामान्यवाचिना अर्थनिर्देशः, क्रियमाणः सर्वधातुविषयः कृतो भवतीति त्यजादीनां क्रियाविशेषवाचिनामपि प्रत्ययः सिध्यति, सामान्यस्य सर्वेषु विशेषेषु सद्भावात्। इत्थ ञ्चेह भावो नाम धात्वर्थ इत्युक्तं भवति। भावः धात्वर्थः, स च पूर्वापरीभूतः, असत्त्वरूपः, अपरिनिष्पन्नश्च। स एव घञादिवाच्य इति स्वीकारे पाकः-पाकौ-पाकेनेत्यादौ लिङ्गसंख्यायोगः अनुपपन्न इति नाशङ्कनीयम्, धाात्वर्थश्च धातुनैवोच्यते, तस्य धात्वर्थस्य सिद्धता - निष्पन्नता नाम यो धर्मः तस्य घञादयः वाचकाः एवञ्च धात्वर्थस्य सिद्धतारूपधर्मस्य सत्त्वभूतत्वात् तदर्थस्य घञ्प्रत्ययेन बोधात् तेन लिङ्गसंख्यायोगः युक्त एव। तदुक्तं यग्विधायके सूत्रे भाष्ये - "कृदभिहितो भावः द्रव्यवत्प्रकाशते"[3] इति।

---

1. अ.सू. ३-३-१८
2. काशिका, पदमञ्जरी, ३-३-१८
3. पा.सू. ३-१-६७

तिङ्प्रकरणे लिङ्गसंख्याद्यनन्वयरूपः, अद्रव्यायमाणः, साध्यावस्थापन्नः भावः समाश्रियते। कृत्प्रकरणे लिङ्गसंख्याद्यन्वयरूपः सिद्धावस्थापन्नः द्रव्यायमाणः भावः आश्रीयत इति तयोर्विशेषः। तदभिहितं नागेशभट्टैः "अनेकार्थत्वात् धातूनां घञन्तभूधातोः सिद्धत्वविशिष्टः क्रियारूपार्थः समाश्रियते" इति।

क्रियान्तराकांक्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तरान्वयायोग्यत्वं सिद्धत्वम्। अन्या क्रिया क्रियान्तरम्, स्वस्याः अन्येत्यर्थः। विलक्षणधर्मः वैजात्यपदेनोच्यते। स चेह सत्त्वभूतः धर्मः। तथा च स्वस्याः भिन्नक्रियाविषयिकाकांक्षायाः उत्पादिका सत्त्वभूतविलक्षणधर्मयुक्ता, कारकत्वेन क्रियान्वययुक्ता, कारकान्तरान्वययायोग्या क्रिया सिद्धक्रिया। सा च पाकः इत्यादौ घञादिप्रत्ययवाच्या। यथा- पाकः इत्यत्र किं पाकः अभूत्, भवति, भविष्यति वेति अन्यस्याः क्रियायाः अपेक्षोदयः, पाकः-पाकौ-पाकाः, पाकं पश्य-पाकेन कृतमित्यादि लिङ्ग - कारक - वचनयोगः, कर्मादिकारकत्वेन क्रियायामन्वयः, स्वतः कारकत्वात् कारकान्तरेणानन्वय इति घञुपस्थाप्य सिद्धक्रिया।

साध्य - सिद्धयोः स्वरूपव्यवस्था हरिणेत्थं न्यरूपि -

**आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता।**
**प्रकल्पिता यथा शास्त्रे स घञादिनिबन्धनः॥**
**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**
**सिद्धभास्तु यस्तस्याः स घञादिष्वपि क्रमः॥ इति।**[४]

पचतीत्याद्याख्यातशब्दे (तिङन्ते) प्रकृतिप्रत्ययाभ्यां भागाभ्यां साद्य - साधनवर्त्तित्वम् अन्वयव्यतिरेकाभ्यामुपस्थाप्यते। यथा पचतौ धातुभागः साध्यक्रियायां, प्रत्ययभागः कारकादौ च वर्तते। तदुक्तं वाक्यकारेण कात्यायनेन - "प्रत्ययार्थस्याव्यतिरेकात् प्रकृत्यन्तरेषु धातोश्चार्थभेदात् प्रत्ययान्तरेष्वन्वयव्यतिरेकाभ्याम्" इति। पचतीत्यत्र विद्यमानस्य प्रत्ययार्थस्य भवतीत्यादौ प्रकृत्यन्तरेषु सत्स्वपि अभेदात्, पच् धातोश्च पचित-पक्ता-पाचकः इत्यादि तृजादिप्रत्ययान्तरेषु विद्यमानेऽष्वपि अर्थाभेदात् प्रकृतिप्रत्ययानां तत्तदर्थग्रहः सुकर इति तदर्थः। एवमाख्याते इव घञन्तपाकादिशब्देऽष्वपि साध्यसाधनवर्तिता बोध्या। पाकादिषु प्रकृतिभागः साध्यरूपमर्थ, प्रत्ययभागस्तु तस्यैव सिद्धरूपमर्थं बोधयति। अर्थात् द्रव्यधर्मैः लिङ्ग-संख्या-कारकशक्तिभिःसम्बन्धयोग्यमाकारं ब्रवीति। इत्थञ्च पाक इत्यादौ कृदन्तस्थले प्रकृतिप्रत्ययरूपभागभेदेन साध्यत्व - सिद्धत्वरूपधर्मद्वयवती पाकक्रिया प्रतीयत इति तात्पर्यम्।

**कृदन्तेष्वपि धातुना साध्यक्रियैवोपपाद्यत इत्यंशस्योपवर्णनम्-**

"धातोः द्वे प्रत्यये तिङः कृतश्च" इति भाष्योक्तदिशा उभयोः तिङ्-कृत् प्रत्यययोः प्रकृतिभूतस्य धातोः समानानुपूर्वीकत्वेन अभेदाध्यवासायात् अन्वयव्यतिरेकाभ्यामर्थवत्त्वप्रकल्पनात् य एव धातुस्तिङन्ते

---

४. वा.प. क्रि.स. ४७-४८

स एव कृदन्ते इति कृत्प्रकृतिभूतधातुरपि तिङन्तस्थले इव साध्यस्वभाववाचकः। तत्र कृदन्ते पाक इत्यादौ घञ: यः भावः घञादिप्रत्ययः स तु क्रियायाः सत्त्वस्वभावं वक्ति। स एवात्र प्रकरणे भावः। कृदर्थश्चायं भावः लिङ्गसंख्याभ्यां युज्यत इति साध्य-सिद्धरूपभिन्नार्थाभिधायित्वात् तिङन्तेभ्यः कृदन्तानामर्थभेदः। एवञ्च तिङन्त-कृदन्तोत्युभयत्र धातुः साध्यक्रियां ख्याति। परमेतावांस्तु विशेषः यत् आख्यातस्थले पूर्वापरीभूतावस्थायाः साध्यस्वभाववत्याः क्रियायाः प्राधान्यं, कृत्स्थले "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन प्रत्ययार्थस्य सिद्धक्रियायाः प्राधान्यात् साध्यस्वभाववत्याः गौणत्वम्।

पाक इत्यादि घञन्तस्थले प्रकृत्या धातुना साध्यावस्थापन्नक्रियायाः समुपस्थापनादेव 'भोक्तुं पाकः', भुक्त्वा पाकः' इत्यादौ क्त्वा-तुमुनादयः उपपद्यन्ते। धातुसम्बन्धाधिकारे क्त्वः, क्रियार्थक्रियोपपदे तुमुन् च विधीयते। उपपदत्रापि क्रियापदेन साध्यस्वभावविशिष्टस्यैव ग्रहणात् पाक इत्यादौ धातुना क्रियायाः साध्यत्वेन भानमित्यभ्युपगन्तव्यमेव।

भावभेदनिरूपणम्-

पाकः इत्यादौ साध्यत्व-सिद्धत्वेति धर्मद्वयविशिष्टा एका क्रिया प्रतीयते। तयोः धर्मयोः भिन्नशब्दाभिधेयत्वात् नास्ति विरोध इत्युक्तम्। तत्र प्रत्ययार्थस्य प्राधान्यात् सिद्धस्वभावविशिष्टस्य भावस्य विशेष्यत्वं प्राधान्यञ्चेति स्थितिः।

इमावेव साध्य-सिद्धभावौ आभ्यन्तर-बाह्यावित्यपि कथ्येते। हरिणा क्रियासमुद्देशे सदृष्टान्तमिमौ विभागौ भेदाभिधानपुरःसरमित्थं न्यरूपि-

**वनं वृक्षा इति यथा भेदाभेदव्यपाश्रयात्।**
**अर्थात्मा भिद्यते भावे स बाह्याभ्यन्तरे क्रमः॥ इति।**

प्रकृते बाह्याभ्यन्तरयोर्भावयोः लक्षणं, तयोर्भेदश्च अमुया कारिकया समुपवर्ण्यते। तथाहि वृक्षसमुदायः वनमित्युच्यते। वनस्यावयवयाः वृक्षाः। समुदायावयवयोः भेदः-अभेद इति नयद्वयम्। वृक्षा इत्यत्र अवयवेषु परस्परभेदः, नानात्वञ्च प्रतीयते वनमित्युक्ते वृक्षरूपाणामवयवानां-समुदायस्य (वनस्य) च अभेदप्रतीतिः। भिन्नशब्दाभ्यां समुदायावयवयोरभिधानमेव अत्रार्थे (भेदाभेदप्रतीतौ) हेतुः। ततश्च वृक्षसमुदायः वनमिति अवयवगतनानात्वपरिहारेण अभेदेन कथ्यते। वृक्षा इति तु अवयवगतनानात्वपुरःसरं भेदेनाभिधीयते। एवञ्च समुदायगताभेदरूपप्रकारेण-अवयगतभेदरूपप्रकारेण समुदायरूपस्य अवयवरूपस्य च अर्थस्वरूपं भिद्यते न तु तयोः शब्दशक्तिमात्रकृतो भेदः। तथाच स्वगतभेदाभेदयोरन्यत्वात् समुदायः-अवयवौ भिन्नावेव।

तद्वत् पाक इत्यादावपि बाह्याभ्यन्तरभेदेन द्विविधः भावः। बाह्यो भावः घञादिवाच्यः, आभ्यन्तरस्तु भावः धातुवाच्यः। धातुवाच्यस्य भावस्य आभ्यन्तरत्वं कुत इति चेदुच्यते - धातोः प्राथम्येन धातौ वाच्यतया विद्यमानस्य धात्वर्थस्य भावस्य घञर्थभावापेक्षया प्रथमोपस्थितत्वादाभ्यन्तरत्वम्। तदनु घञ्प्रत्ययवाच्यस्य भावस्य द्वितीयकल्पत्वात् बाह्यत्वम्।

तिङन्तेन-कृदन्तेन च् अभिधीयमानः भावः शब्दशक्तिस्वाभाव्यात् भिद्यते। तयोः भिन्नार्थत्वोपपादकाः

त्रयः विशेषाः भाष्यकारेणोपादर्शि "सार्वधातुके यक्" इति सूत्रे भाष्ये। ते च यथा-

कृदभिहितो भावः द्रव्यवद्भवति, न क्रियावत्। द्रव्यं हि क्रियया समवायं (सम्बन्धं) प्राप्नो... तद्यथा द्रव्यं क्रियानिवृत्तै (उत्पादने) साधनत्वमुपैति। घटो वर्तते इति वृत्तिक्रियायां घटरूपद्रव्यस्य ... कर्तृत्वं तद्वत् पाको वर्तते इत्यत्र पाकस्यापि (कृदभिहितभावस्यापि) तस्यामेव क्रियायां कर्तृत्वं लगते ... श्च द्रव्यत्वेन प्रसिद्धः यो घटः तद्वदयं भावो भवति अर्थात् द्रव्यस्य लिङ्गसंख्यासाधनसम्बन्धवदस्य भावस्य तैः सह सम्बन्धः। तिङभिहितस्य (तिङन्तेनाभिहितस्य) तु न तथा।

अत्रार्थे व्यतिरेकदृष्टान्तमुपदर्शयति यथा - क्रिया क्रियया समवायं न गच्छति। पचति पठति इ... पठनक्रियायां पाकक्रियायाः यथा न कर्तृत्वसाधानत्वं नैव पाको वर्तते इत्यत्र पाकस्य (वृत्तिक्रियायां ... एव कर्ता)। एवञ्च कृदभिहितो भावः क्रियानिवृत्तौ साधनं भवति, तिङभिहितस्तु न तथेति तयोर्वैषम्य... यद्यपि पचति भवति, पश्य मृगो धावति इत्यादौ तिङभिहितस्यापि भावस्य क्रियाभिनिवृत्तौ साधनत्वं ... तथापि तिङभिहितो भावः सर्वसाधनान्यवानर्ह इति तात्पर्यम्। पचति भवतीत्यत्र पाककर्तृका भवनक्रि... पश्य... इत्यस्य मृगकर्तृकं धावनकर्मकं दर्शनमिति सामान्यतो बोधः।

द्वितीयं वैषम्यमाह तिङभिहित-कृदभिहितभावयोः यथा - तिङन्तेन भावस्याभिधाने (भावे ... लकारे) तेन भावेन कालः-पुरुषः-उपग्रहश्च व्यक्तो भवति। पठति-अपठत्-पठिष्यति-अपाठीत्-पपाठ... कालभेदावगमः। पठति-पठसि-पठामि इत्यादौ पुरुषावगमः। उपग्रहो नाम क्रियाफल... कर्तृगामित्व-परगामित्व-उभयगामित्वरूपः। यजति-यजते इत्यादौ यथा। कृदभिहितस्य भावस्याभिधाने ... नैतेषामवगमः।

तिङभिहितस्य-कृदभिहितभावस्य च तृतीयः विशेषस्तावत् - तिङभिहितस्य (तिङन्तेन) भा... कर्त्रा योगः भवति, कृदभिहितस्य तु न। उक्तं हि भाष्ये - "अस्ति खल्वपि विशेषः कृदभिहितभा... तिङभिहितो भावः कर्त्रा संप्रयुज्यते, कृदभिहितः पुनः न संप्रयुज्यते" इति।[१] यद्यपि 'ब्राह्मणानां प्रादु... इत्यादौ "कर्तृ कर्मणोः कृति" इत्यनेन कर्तरि षष्ठीविधानात् कृदभिहितभावस्यापि कर्त्रा योगः अस्ति ... तथापि तिङन्ते पचतीत्यादौ एकपदोपात्तकर्त्रा सह भावस्य योगः, कृदन्तस्थले पाक इत्यादौ तु भिन्नपदवाच्य... सह योग इति भावः कर्त्रा न संप्रयुज्यते।

अथवा तिङन्ते धातुना प्रतिपादितस्य भावस्य साध्यस्वभावत्वात्, नियमेन तस्य कर्त्रा सह यो... कृदन्ते धात्वभिहितस्य भावस्य कृता सिद्धरूपतयाभिधानेन नियतः कर्त्रा योगः नास्ति। न हि पाकः ... इत्युक्ते कस्येति नियमेन कर्त्राकांक्षा उदेति, नापि कर्तुः नियमेन प्रयोगः, सिद्धरूपस्य कर्त्रा ...

---

१. कृदभिहितस्य भावस्य पाकादिक्रियायाः अरूपत्वेन अद्रव्यत्वेऽपि इदं तदिति परामर्शयोग्यत्वेन "वस्तुपलक्षणं ... सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः"।। इत्यादि लक्षणलक्षितद्रव्यत्वात् द्रव्यवदिति ... उपमानोपमेयभावः कथमिति नाशङ्कनीयम्। प्रसिद्ध्यप्रसद्ध्यपेक्ष्यस्य उपमानोपमेयभावस्य स्वीकारात्। घटः ... प्रसिद्धः। कृदभिहितभावस्तु द्रव्यत्वेनाप्रसिद्धः। तयोरुपमानोपमेयभावः।

योगाभावात्। (चैत्रः पचतीतिवत् चैत्रस्य पाक इति नियमेन प्रयोगाभावः) अर्थात् तिङन्ते साध्यस्वभावाप अभिधानेन तस्य कर्त्रा सह प्रधानतया योगः। कृदन्ते तु उपलक्षणभावेन (विशेषणेन) भावः युज्यते। यथा पचतीत्यत्र 'देवदत्तः' इति कर्तुः प्रधानेनान्वयः। पाकः इत्यत्र तु कस्येति प्राधा सम्बन्ध्याकांक्षा, ततः कर्त्रा योग इत्यप्राधान्येन तद्योगः एवञ्च उभयोर्भावयोः कर्तुयोगे तुल्यत्वे प्राधान्य-अप्राधान्यनिबन्धनः भेदः ज्ञेयः।

तथा च कृदन्ते-तिङन्ते च एकैव क्रिया प्रतीयते। तस्याः स्वभावः साध्यसिद्धरूपेण बाह्य-आभ्यन्तररूपे वा भिद्यते।

- शोधच्छात्रा (व्याकरणविभागः)
राष्ट्रिय-संस्कृत-संस्थानम्
राजीवगान्धी परिसरः श्रृङ्गेरी

६. सर्वाधातुके यक् ३-१-६७

ISSN-2277-6443

# विद्यारश्मिः

राष्ट्रियवार्षिकशोधपत्रिका

ANNUAL NATIONAL RESEARCH JOURNAL

2014



राष्ट्रियसंस्कृतसंस्थानम्

(NAAC द्वारा A श्रेण्यां प्रत्यायितः मानितविश्वविद्यालयः)

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

क.जे.सोमैयासंस्कृतविद्यापीठम्, मुम्बई

# शब्दार्थसम्बन्धविचारः

❑ पि. आर्. अर्चना कारन्त्

[ शब्दार्थयोर्नित्यसम्बन्धत्वे सिद्धे तदुपायतया स्फोटात्मकं शब्दब्रह्मवादम् , शाब्दबोधहेतुम् , धात्वर्थवादञ्च निर्दिशति । शब्दाश्रितानां कार्याणामर्थे प्रवृत्तिः, अर्थाश्रितानां च शब्दे प्रवृत्तिरिति शब्दतदर्थयोस्तादात्म्यं स्पष्टम् । साधुशब्दानां प्रयोगे पुण्योत्पत्तिः, असाधुषु केवलमर्थबोधकत्वमिति विवेकोऽप्यत्र श्रद्धेयः। ]

शब्दसाधुत्वप्रतिपादनपराणामाकरग्रन्थानां परिशीलने सति श्रेष्ठस्य मुख्यवेदाङ्गत्वेन प्राप्तप्रतिष्ठस्य शब्दानुशासनस्य प्रमुखतः स्वरूपद्वयं समुपलभ्यते । एकं लौकिक-वैदिकोभयविधशब्दव्युत्पादकं प्रक्रियात्मकं, अपरं परमार्थवस्तुप्रतिपादकं प्रमेयात्मकम् । तत्र द्वितीयेंऽशे स्फोटात्मकशब्दब्रह्मवादः, शाब्दबोधहेतुतावादः, बौद्धपदार्थवादः, नञर्थ-निपातार्थविचारः, धात्वर्थवादः इत्येवमादयः सिद्धान्ताः द्रष्टव्याः । दार्शनिककोटिप्रविष्टेषु विषयेषु शब्दार्थोभयसम्बन्धविचारः अन्यतमः, प्रमुखश्च । (अत्र द्वे अंशे निरूप्ये, एकस्तु शब्दार्थसम्बन्धस्य नित्यत्वम्, द्वितीयस्तयोः सम्बन्धविचारः ।)

तथा हि शब्दः, अर्थः, तयोः सम्बन्धश्च नित्यः- अकृतकश्चेति वैयाकरणसमयः । तत्र शब्दः स्फोटाख्यः, अर्थः द्रव्यं-जातिर्वा । (जातिलक्षणस्यार्थस्य नित्यत्वं तु स्वतः सिद्धम् । द्रव्यत्वपक्षेऽपि सर्वशब्दानाम् असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं वाच्यमित्यर्थे नित्यत्वम् । एवं शब्दार्थयोरिव तत्सम्बन्धस्यापि नित्यत्वं पर्यवस्यति ।) "पृषोदरादीनि यथोपदिष्टम्", "सिद्धे शब्दार्थसम्बन्धे", "नित्येषु शब्देषु कूटस्थैरविचालिभिरनपायोपजनविकारिभिर्भवितव्यम्" इत्यादि सूत्र-वार्तिक-भाष्यवचनान्यत्र गमकानि । कथितं हि वैयाकरणमूर्धन्येन भर्तृहरिणा वाक्यपदीये–

> नित्याः शब्दार्थसम्बन्धाः तत्राम्नाता महर्षिभिः ।
> सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः ॥ इति ।

शब्दश्रवणानन्तरं कस्यचित् तदर्थविशेषज्ञानं भवति, कस्यचिन्न भवतीति वैलक्षण्यसद्भावात् शब्दस्य अर्थविशेषेण सह सम्बन्धः कश्चनावश्यं भवेदेव, यश्च शब्देन अर्थस्याभिधाने हेतुः । स च शब्दार्थयोः सम्बन्धः स्वभावसिद्धः, अनादिः, प्राप्ताविच्छेदश्च । तदुक्तं मीमांसासूत्रे – "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" इति । व्याडिनाऽप्यगादि– "सम्बन्धस्य न कर्तास्ति शब्दानां लोकवेदयोः" इति । यथा माता-पुत्रयोः जन्यजनकभावसम्बन्धस्य लोकव्यवहारः निश्चायकः तद्वत् स एव शब्दार्थयोः सम्बन्धस्यापि नियामकः ।

तत्र शब्दार्थयोः कार्यकारणभावः, योग्यताख्यश्च सम्बन्ध इति प्राचीनाः । तादात्म्यं सम्बन्ध इति नवीनाः । तथा हि शब्दः ज्ञातः अर्थबोधे कारणम्, अर्थबोधश्च विवक्षावशात् शब्दोच्चारणे कारणमित्यतः शब्दः बोध्यस्यार्थस्य, अर्थश्च बोधकशब्दस्य कारणम् । तेन शब्दार्थयोः परस्परकार्यकारणभावसम्बन्धः, निमित्त-

निमित्तिभावः सम्बन्धः पर्यवस्यति । द्वितीयश्च इन्द्रिय-विषययोरिव शब्दार्थयोः प्रकाश्य-प्रकाशकभावरूपः योग्यताख्यः सम्बन्धः । योग्यता च अर्थप्रतिपादनशक्तिः । यथा चक्षुरादीनां रूपादि विषये पुरुषप्रयत्ननैरपेक्ष्येण रूपादिग्रहणयोग्यता तद्वत् शब्दे अर्थग्रहणयोग्यता अर्थे च शब्दग्राह्यत्वयोग्यता स्वाभाविकी, अनादिश्च । अयमेव शब्दार्थयोः योग्यताख्यः सम्बन्धः । यथा यत्नेनापि रूपे रसनविशेषः न शक्यक्रियः, तथा घटादिशब्दानामपि घटाद्यर्थविषये एव तादृशी बोधकता न तु गवाद्यर्थे ।

**'घट इति शब्दः, घट इत्यर्थः , योऽयमर्थः स शब्दः, यः शब्दः स अर्थः'** इति अभेदाध्यवसायमूलकं तादात्म्यं शब्दार्थयोः योग्यतासम्बन्धस्य ग्राहकम् । अतः स एव शब्दार्थयोः सम्बन्धः, तस्यैव पदपदार्थोभयनिष्ठत्वात् विशिष्टबुद्धिनियामकत्वाच्चेति नवीनाः । अर्थे शब्दस्य, शब्दे चार्थस्याध्यास एव सङ्केतनाम्ना व्यवह्रियते । (समवायादिनिमित्तानपेक्षयैव उच्चरितमात्रात् शब्दात् अर्थप्रत्ययोत्पत्तेः अकृत्रिमा चैषा शक्तिः । स्वाभाविकीमेव च योग्यतां सङ्केतो द्योतयति ।) महाभाष्ये पतञ्जलिर्जगाद– "सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्द" इति । स च सङ्केतः नैयाकिकाभिमतः ईश्वरेच्छारूपः, शाब्दिकाभिमततादात्म्यरूपश्चेति द्विविधः ।

तत्र **'अस्माच्छब्दादयमर्थो बोद्धव्यः, इदं पदममुमर्थं बोधयतु'** इत्याकारका ईश्वरेच्छा एव शक्तिः, सैव सङ्केतपदवाच्या, सैव पदपदार्थयोः सम्बन्ध इति नैयायिकाः प्रोचुः । परं तत् शाब्दिकानामनभिमतम् सङ्केतस्य शक्तिग्राहकत्वेन मुख्यशक्तित्वाभावात् । **'अयमर्थः एतस्य पदस्य शक्यः, अस्मिन्नर्थे अस्य पदस्य शक्तिः'** इत्याकारकस्य सङ्केतस्य शक्त्यपेक्षया भिन्नरूपेण प्रसिद्धत्वात् । किञ्च सङ्केतो यदि शक्तिरूपः स्यात् तदा पूर्वोक्तवाक्ये घटकतया शक्तिनिवेशो न स्यात्, स्वस्य स्वघटकत्वाभावात् । तदुक्तं योगवाचस्पत्ये– **" सर्वे च शब्दाः सर्वार्थाभिधानसमर्थाः इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसङ्केतस्तु प्रतिपादकः"** इति । किञ्च वाचस्पतिमिश्रेण **"सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः सङ्केतः, तद्व्यवहाराच्च अस्मदादीनामपि सुग्रहः सङ्केतः"** इत्यभिधानपूर्वकं सङ्केतस्यानादित्वमपि सूचितम् । तस्य ज्ञानं तु वृद्धव्यवहारपारम्पर्यात् सुबोधम् । (**"सम्बन्धो हि सम्बन्धिभ्यां भिन्नः, द्विष्ठः, आश्रयतया विशिष्टबुद्धिनियामकः"** इत्यभियुक्तव्यवहारात् इच्छायाः सम्बन्धत्वोपपादनमप्यशक्यम् । घटवद्भूतलमित्यादौ संयोगवान्घटः इतिवत् इच्छावान्घटशब्द इति व्यवहारासम्भवात् ।)

(सर्वैरर्थैः सर्वशब्दानां सम्बन्धश्च योगिज्ञानगम्य एव, तेषां योगबलेन शब्दार्थोभयरूपपराप्रत्यक्षत्वात् ।)

किन्तु पदपदार्थयोः तादात्म्यं सम्बन्धः । तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् । भेदाभेदसमनियतमिति यावत् । स च सम्बन्धः शक्त्यतिरिक्तः । यथा प्रकाशनशक्तिमतः दीपस्य कार्यजनकत्वं दीप-वस्तुनोः शक्त्यतिरिक्तसंयोगादिसम्बन्धसत्त्वे एव भवति तथैव शब्दगतशक्तेरपि शाब्दबोधरूपकार्यजननं शक्त्यतिरिक्तसम्बन्धसत्त्वे एव, नान्यथा । आह च हरिः–

> उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते ।
> शक्तीनामप्यसौ शक्तिः गुणानामप्यसौ गुणः ॥ इति ।

शब्दार्थयोः तादात्म्यस्वीकारादेव अर्थं श्रुणोति, अर्थं वदतीत्यादयः व्यवहाराः उपपद्यन्ते । अर्थे

श्रावणप्रत्यक्षत्वं, उच्चारणकर्मत्वञ्चासम्भवं सत् तयोस्तादात्म्यं गमयति । एवं 'ओमित्येकाक्षरं ब्रह्म' इति वर्णब्रह्मणोरभेदप्रतिपादनं, 'रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः' इत्यनेन रामशब्दमात्रे पिनाकिनो मानभङ्गकथनं, "वृद्धिरादैच्" इत्यस्य वृद्धिपदाभिन्ना आदैच् इति बोधश्च शब्दार्थयोः तादात्म्यमूलक एव ।

शब्दार्थयोः तादात्म्यस्वीकारे शब्दानां स्वस्वविशिष्टेनार्थेन अभेदरूपेणान्वयात् शब्दो हि शब्दान्तराद्भिद्यते । ततश्च अर्थवैभिन्येन शब्दवैभिन्यात् अर्थकृतभिन्नतामाश्रित्य शब्दानामपि भिन्नता प्रतीतेः शब्दनानात्ववादः समुपपद्यते । "एकोऽयं शब्दः नानार्थः, अक्षाः पादाः माषाः" इत्यादि सरूपसूत्रस्थभाष्यं तु समानानुपूर्वीयुक्ता इत्यभिप्रायमूलकम् । इत्थञ्च अर्थभेदेन शब्दानेकत्वं, समानाकृत्या शब्दैकत्वमित्युभयमपि समर्थ्यते शास्त्रविपश्चिद्भिः ।

ननु शब्दार्थयोस्तादात्म्ये अर्थाश्रितानां कार्याणां शब्दे प्रवृत्तिः, शब्दाश्रितानाञ्चार्थे प्रवृत्तिः । ततश्च मधुशब्दोच्चारणे मुखे माधुर्यं, अग्निशब्दोच्चारणे दाहादिकञ्च स्यादिति चेन्न– तयोः वस्तुतः भेदस्य, आरोपिताभेदस्य च सत्त्वात् । तत्र यदा भेदस्य उद्भूतत्वविवक्षा तदा 'अस्यार्थस्यायं वाचकः', 'उञः प्रगृह्यम्', 'तस्य वाचकः प्रणवः' इत्यादौ तच्छब्दात् षष्ठी । अभेदस्य तत्त्वविवक्षायां तु प्रथमा, वृद्धिरादैजित्यादाविव ।

यद्वा सिद्धान्ते बुद्धिदेशस्थयोः शब्दार्थयोस्तादात्म्याङ्गीकारेण न क्वापि क्षतिः । तदवलम्बने बौद्धः अर्थः शक्यः, स्फोटात्मकः शब्दोऽपि बौद्धः शक्तः । उक्तं हि कैय्यटेन पस्पशाह्निके - "बुद्धिप्रतिभासः शब्दार्थः, यदा यदा शब्दः उच्चारितः तदा तदा अर्थाकारा बुद्धिरुपजायत" इति । (बौद्धार्थस्वीकारादेव "एष वन्ध्यासुतो याति खपुष्पकृतशेखरः" इत्यादौ वन्ध्यासुतादि शब्दानां प्रातिपदिकत्वात् स्वाद्युत्पत्तिः । शब्दानामेषां बाह्यार्थशून्यत्वेऽपि बुद्धिपरिकल्पितवाच्यार्थमादाय अर्थवत्त्वात् प्रातिपदिकत्वं सेत्स्यति, अन्यथा बाह्यदेशीयार्थवत्त्वाभावात् तन्न स्यात् ।)

पूर्वोक्तः सम्बन्धः साधुषु-असाधुषु च उभयसाधारणतया वर्तते । परमेतावांस्तु विशेषः यत् साधुषु विद्यमानः सम्बन्धः पुण्यजनकः-साक्षादर्थबोधकश्च । असाधुषु विद्यमानः केवलमर्थबोधक एव, न पुण्यजनकः । (साधुशब्देष्विव अपभ्रंशेऽष्वपि शक्तेः तुल्यत्वादेव "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इतिभाष्यं, "वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः" इति हरिकारिका च सङ्गच्छते) इति शम् ॥

*****

शोधच्छात्रा
राजीवगान्धी परिसरः,
श्रृङ्गेरी, कर्णाटकम्

# शारदा

वार्षिकपत्रिका



प्रधानसम्पादकः

आचार्य ए. पि. सच्चिदानन्दः

सम्पादकौ

डा. रामचन्द्रुल बालाजी　　डा. चन्द्रकला आर् कोण्डी


## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी - ५७७ १३९

२०१३-१४

# SHARADA

ISSN: 2320-740X

Chief Editor: Prof. A. P. Sachid

Editorial Board:
Dr. Ramachandrula Bal
Dr. Chandrakala R. Kon
Dr. Rajeshkumar Shukla
Smt.Kavitha S
Sri.Vinay M. S
Sri.Vinayakiran H.
Sri. Soorya Hebbar
Sri. Gopalakrishna Hangari

Year of Publication: 2014
© Rashtriya Sanskrit Sansthanam (DU)
Rajiv Gandhi Campus,
Sringeri - 577 139, Karnataka

No. of Copies: 550

Published By:
The Principal
Rashtriya Sanskrit Sansthanam (DU)
Rajiv Gandhi Campus,
Sringeri - 577 139, Karnataka

DTP By:
Sri Pruthviraj K

Designed By:
Sri K.V Shashidhar, Sri Raveesha N

Printed At:
Diganta Mudrana Ltd, Mangalore

© All rights are reserved for the Principal, Rajiv Gandhi Campus, Sringeri. Provided that contri
responsible for their respective writing.

1. का. वा. 241
2. का. वा. 243
3. वै. सि. कौ. का. वा. 223
4. वै. सि. कौ. का. वा. 3183
5. परि. 13
6. पा. धा. 1078

## त्व-तल्प्रत्ययार्थः

पि. आर्. अर्चना
शोधच्छात्रा

'तस्य भावस्त्वतलौ' इति सूत्रेण षष्ठ्यन्तात् भाव इत्यर्थे त्वतलौ विधीयेते । तथाहि - पदं सुबन्तं, तिङन्तं द्विविधम् । तत्र सुपां प्रकृतिभूतानि यानि नामानि तेषामर्थविषये पक्षपञ्चकमौत्सर्गिकरूपेण वर्वर्ति यथा-

**एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा ।**
**नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥** इति ॥

(वैयाकरणमतोन्मज्जनम्, नामार्थप्र., श्लोक सं.25)

स्वार्थः - प्रवृत्तिनिमित्तं, व्यक्तिः, लिङ्गं, संख्या, कारकञ्चेति पञ्चकं प्रातिपदिकार्थ इति तत्र मुख्यः पक्ष उपात्तेषु पञ्चप्रातिपदिकार्थेषु प्रथमोपस्थितं यत् प्रवृत्तिनिमित्तं तदेवेऽह भावशब्देनाभिधीयते, स एव भावः त्वतलादि प्रत्ययैः कथ्यते ।

प्रकृत्यर्थस्य एकदेशः अथवा शब्दानां प्रवृत्तौ यन्निमित्तं (हेतुः) सः भावः । प्रकृतिः - प्रातिपदिकं, तदर्थैकदेश विशेषणीभूतः जात्यादिः, सम्बन्धादिश्च यः धर्मः स एव भावः । दीक्षिताः कौमुद्यां जगदुः - '**प्रकृतिजन्यबोधे प्रकारो भावः**' इति । प्रकृतिः - त्वादिप्रत्ययानां या प्रकृतिः, यथा गोत्वमित्यत्र त्वप्रत्ययप्रकृतिः गोशब्दः, तज्जन्यो यो बोधः ...पदनिष्ठशक्त्या जायमानः गोत्वविशिष्टानां गोव्यक्तीनां बोधः, तत्र बोधे यः प्रकारः - योऽर्थः विशेषणतया भासते गोत्वमित्यादि ...तिः, स एव भावः त्वादि प्रत्ययेनोच्यते । यथा घटस्य भावः घटत्वम्, गोर्भावः गोत्वमित्यादि ।

शब्दप्रवृत्तिनिमित्तं क्वचित् जातिः, क्वचित् गुणः, क्वचित् व्यक्तिः, क्वचित् सम्बन्धः, क्वचित् द्रव्य... ...प्रकारकम् । तथाहि - ये रूपादयः शब्दाः गुणमात्रवाचकाः तेभ्यः जातिः प्रवृत्तिनिमित्तम् । गुणे समवायेन ...ात् । तथा च रूपत्वमित्यत्र सकलरूपनिष्ठो जातिविशेषस्त्वप्रत्ययार्थः ।

'**गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति**' इति कोशप्रामाण्यात् शुक्लादयः शब्दाः गुण - गुणिवृत्तयः इति ... शुक्लादिशब्दाः गुणवाचकाः तदा तेषां गुणसमवायि सामान्यं प्रवृत्तिनिमित्तमिति तत्र भावप्रत्ययः । यथा शुक्लत्वं ... । यदा पुनः शुक्लादिशब्दाः गुण - गुणिनोरभेदोपचारात् गुणिवाचकाः अथवा गुणवाचकशुक्लादिशब्दात् गुणि... ...मस्यास्तीति) मतुपि, तस्य '**गुणवचनेभ्यो मतुपो लुगिष्टः**' इति वार्तिकेन लुकि कृते '**शुक्लः पटः**' इत्यादौ शुक्लादि... ...चकाः तदा तेभ्यो गुणे एव भावप्रत्ययः । तत्र गुणस्यैव प्रकृत्यर्थं प्रति प्रकारत्वात् । यथा शुक्लत्वमिति गुणः ।

अणु-महत्-दीर्घादयः शब्दाः नित्य परिमाणिन्यर्थे भवन्ति, न तु कदापि परिमाणरूपे गुणे। अतस्तेषा परिणामरूपगुण एव प्रवृत्तिनिमित्तमिति तत्रैव भावप्रत्ययः ज्ञेयः, तस्यैव प्रकृत्यर्थे प्रकारत्वात्। यथा - अणुत्वं, महत्त्वं, दीर्घत्वमित्यादीनि परिमाणानि। षत्वं, णत्वमित्यादौ तु इतरेभ्यः भिन्ना या षकारवर्णव्यक्तिः तत्समवेतसामान्ये, इतरवर्णसमवेतसामान्यतो विशेषे भावप्रत्ययः।

समास-कृदन्त-तद्धितान्तशब्दानां सम्बन्ध एव प्रवृत्तिनिमित्तमिति स एव भावप्रत्ययेन बोध्यते, समासादिषु विशिष्टशक्तिस्वीकारात् सम्बन्धस्यापि वृत्तौ प्रवेशात्। तथा च राजपुरुषत्वमित्यत्र स्वस्वामिभावसम्बन्धः, पाचकत्वमित्यत्र क्रियाकारकसम्बन्धः, औपगवत्वमित्यत्र अपत्यापत्यवत्सम्बन्धः यथायथं त्वप्रत्ययार्थः। उक्तं हि हरिणा भाष्यटीकायां - '**कृत्तद्धितसमासेभ्यो सम्बन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः**' इति। समास-कृदन्त-तद्धितान्तेभ्यः विहितस्य भावप्रत्ययस्य सम्बन्धः अर्थः, परं रूढि-अभिन्नरूप-अव्यभिचरितसम्बन्धाभिधानशब्दानां समासादित्वेऽपि तेभ्यः विहितस्य भावप्रत्ययस्य जात्यादिरेवार्थः, न तु सम्बन्धेति वचनस्यार्थः।

तत्र समासाज्जायमानस्य भावप्रत्ययस्य यः सम्बन्धरूपार्थः उक्तः स : पक्षभेदेन सम्भवति। तथाहि वृत्तिः जहत्स्वार्था, अजहत्स्वार्थेति द्विविधा। द्वेऽपि वृत्ती भेदः, संसर्गः, भेदसंसर्गभेदेन पुनस्त्रिविधे। तत्र भेदपक्षे सम्बन्धः न भावप्रत्ययार्थः। तस्मिन् पक्षे राजपुरुषः इत्यस्य 'अराजकीयभेदविशिष्टः पुरुषः' इत्यर्थात् पुरुषे राजसम्बन्धस्य भानं प्रकारतया न सम्भवतीति हेतोः सम्बन्धः त्वप्रत्ययार्थो न। किन्तु भेदः प्रकृत्यर्थे प्रकार इति कृत्वा स एव त्वाद्यर्थः। संसर्गपक्षे राजपुरुषः इत्यस्य 'राजसम्बन्धवान्पुरुषः' इति, भेदसंसर्गोभयपक्षे अराजकीयभिन्नः राजसम्बन्धवान्पुरुषः इत्यर्थबोधात् अनयोः पक्षयोः प्रकृत्यर्थे सम्बन्धस्य प्रकारतया सः त्वाद्यर्थेन गृह्यते।

परं दामोदरत्वम् - कृष्णसर्पत्वम् इत्यादौ दामोदर - कृष्णसर्पादिशब्दानां समासत्वेऽपि ततो विहितस्य त्वादेः न सम्बन्धः अर्थः, किन्तु जातिरेव, 'अन्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्यः' इत्युक्तत्वात्। कृष्णसर्पः इत्यत्र '**विशेषणं विशेष्येण बहुलम्**' इति सूत्रे बहुलग्रहणान्नित्यसमासः। शब्देनानेन न कस्यचित् कृष्णवर्णविशिष्टस्य सर्पस्य ग्रहणं, किन्तु कृष्णसर्पेति जातिविशेषविशिष्टस्यैव। अतोऽयं शब्दः न यौगिकः, किन्तु अनादिवृद्धव्यवहारपरम्परया सर्पजातिविशेषशक्तः रूढिशब्दः। एवं सामासिकः दामोदरशब्दोऽपि भगवति नारायणे रूढः, न तु तेन दाम्ना बद्धोदरस्य प्रतीतिः। ततश्च सत्यपि समासे दामोदर - कृष्णसर्पेति रूढिशब्देभ्यः विहितयोः भावप्रत्यययोः न सम्बन्धः अर्थः, किन्तु जातिरेव। यथा - दामोदरत्वं जाति, कृष्णसर्पत्वं जातिः। न च दामोदरत्वस्य एकव्यक्तिनिष्ठत्वात् अनेकव्यक्तिनिष्ठत्वाभावात् न आकृतित्वेन ग्रहणमिति वाच्यम्, कल्पभेदेन - अवस्थाभेदेन वा व्यक्तिभेदस्वीकारात्। एवं गौरमुख सप्तपर्णेत्यादीनां समस्तानां, खर - हस्ति - कुञ्जरादीनां तद्धितान्तानां, ह - रजक - कुम्भकारादीनां कृदन्तानां रूढिशब्दानां जातावेव भावप्रत्ययः, तत्र तत्र जातेरेव प्रवृत्तिनिमित्तत्वात्।

शुक्लत्वमिति अभिन्नरूपस्योदाहरणम्। प्रत्ययान्तत्वेऽपि प्रत्ययलुका प्रकृतिसमानाकारत् '**शिष्यमाणः लुप्यमानार्थाभिधायी**' इति न्यायेन प्रकृत्यर्थान्वितप्रत्ययार्थाभिधायी शब्दः अभिन्नरूपः शब्दः। तस्मादुत्पन्नः भावप्रत्ययोऽपि सम्बन्धं वक्ति, किन्तु गुणमेव। यथा - शुक्लादयः शब्दाः गुणे - गुणिनि चाभिन्नरूपाः अर्थात् समानानुपूर्वीकाः। तथा हि गुणवाचकशुक्लशब्दात् '**तदस्यास्त्यस्मिन्निति मतुप्**' इति शास्त्रेण गुणवत्यर्थे मतुपि, तस्य '**गुणवचनेभ्यो मतुपो लुगिष्टः**' इति वार्तिकेन लुकि, लुप्तमतुबन्तः शुक्लशब्दो गुणवद्द्रव्यवाचको भवति, '**घटः शुक्लः**' इति घटादिना द्रव्येण सामानाधिकरण्यानुरोधात्। तथा च शुक्लो गुणः इत्यत्र गुणवाचकशुक्लशब्दस्य यानुपूर्वी सैवः घटः शुक्लः इत्यादौ द्रव्यवाचकस्य इति अभिन्नरूपोऽयं तद्धितान्तः

(लुप्तमतुबन्तः) शुक्लशब्दः । अतः तस्मादपि विहितस्य त्वादिप्रत्ययस्य न सम्बन्धः अर्थः, किन्तु गुण एव । यथा शुक्ल[illegible] गुणः, शुक्लगुणविशिष्टद्रव्ये गुणस्यैव प्रकारत्वात् ।

अव्यभिचरितसम्बन्धे यथा – सत्ता । व्यक्तेरुत्पत्तिमारभ्य आविनाशं यावत् तद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगित्वं [illegible] अव्यभिचरितसम्बन्धः । सतः वस्तुनः सत्तया जात्या सह नित्यसम्बन्धात् सद्वस्तुनि सत्तारूपसम्बन्धस्य व्यभिचाराभावात् [illegible] अव्यभिचरितसम्बन्धवाचकः । अतः सदिति शब्दस्य कृदन्तत्वेऽपि न तस्य सम्बन्धः प्रवृत्तिनिमित्तं, किन्तु जातिरेव [illegible] इति । यत्र तु सम्बन्धः व्यभिचरति तत्र सम्बन्धस्य प्रवृत्तिनिमित्तत्वात् तत्रैव भावप्रत्ययः, राजपुरुष इत्यादौ । एवञ्च सत्सु [illegible] नित्यसमवायिनी शब्दप्रवृत्तिहेतुः सत्तैव भावप्रत्ययवाच्या, तस्या एव प्रवृत्तिनिमित्तत्वात्, तस्या एव प्रकृत्यर्थे प्रकारत्वाच्च ।

धवखदिरत्वम् इत्यादिजातिद्वन्द्वात् जातिसमुदाये प्रवृत्तिनिमित्ते भावप्रत्ययः, न तु सम्बन्धे । द्वन्द्वे गुणप्रधान[illegible] अभावेन सम्बन्धायोगात् । एवञ्च इतरेतरयोगद्वन्द्वे सर्वत्र समस्यमानपदार्थसमुदाये भावप्रत्ययः । धवखदिरत्वमित्य[illegible] अनुद्भूतावयवभेदविवक्षयाम् एकवचनं, उद्भूतावयवभेदविवक्षायां तु धवखदिरत्वे इति द्विवचनादिकमपि ।

'नानात्वं-सहत्वं-यौगपद्यमित्यादौ नानाशब्दः असहभूते, सहशब्दः सहभूते वृत्तौ वर्तते । अतस्तेषु [illegible] असहभावादौ प्रत्ययः' इत्यचकथन्नागेशः । अनेकस्यार्थस्य एकीकरणं सहभावः । एककाले अर्थे युगपदित्यव्ययम् । [illegible] नानात्वमित्यादौ कथं प्रत्ययः, षष्ठीसमर्थात् प्रत्ययविधानात् नानेत्यादीनामव्ययानाम् असत्त्ववाचित्वात् षष्ठ्यर्थाऽयोगात् इतिचेदुच्यते – असत्त्वभूतोऽप्यर्थः शब्दान्तरेण प्रत्यवमृष्टः षष्ठ्यर्थेन युज्यते, नाना इत्यस्य भावः नानात्वम्, युगपदित्यस्य भावः यौगपद्यमित्यादि शब्दान्तरेण प्रत्यवमृष्टम् अर्थम् एकार्थीभावमहिम्ना वृत्तिरेव बोधयतीत्यतः वृत्तौ इतिशब्दस्याप्रयोगः । ततश्च षष्ठीसमर्थत्वमुपपन्नम् ।

ममत्वं – ममता इत्यत्र अस्मच्छब्दात् षष्ठ्यर्थे विद्यमानात् लिङ्गत्रयसाधारणात् विभक्तिप्रतिरूपकात् [illegible] त्वतलौ । मम भाव इति विग्रहः । तदुक्तं प्रबोधचन्द्रोदये 'वत्स, ममतावासनानिबन्धनोऽयं व्यामोह' इति । कुमारसम्भवे[illegible] 'क्षुद्रोऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव' इति । एवञ्च यद्ज्ञानादर्थे शब्दस्य प्रवृत्तिः सः (ज्ञानं) प्रत्ययार्थः [illegible] एव भावशब्देनोच्यते ।

कुत्वमित्यत्र संज्ञिनि अध्यस्ते संज्ञास्वरूपे, संज्ञासंज्ञिसम्बन्धे वा भावप्रत्ययः । कु इति न संज्ञा । यथा देवदत्तेत्यादि संज्ञाशब्देषु शब्दातिरिक्त – अर्थप्रवृत्तिनिमित्तराहित्यात् देवदत्तत्वमित्यादौ शब्दस्वरूप (देवदत्त इत्यानुपूर्वी) एव [illegible] प्रवृत्तिनिमित्तमिति तत्रैव भावप्रत्ययः, एवं कुत्वमित्यत्रापि कु इति शब्दस्वरूपे त्वप्रत्ययः । शब्दार्थयोः अभेदाध्यवसायात् ग्राह्यत्व – ग्राहकत्वशक्तियुक्तत्वाच्च शब्दस्य जातिवत् व्यक्तिविशेषणतया भासमाने शब्दस्वरूपे प्रत्ययः । विचारितश्चायं विषयः कैयट – नागेशाभ्यां 'वृद्धिगदैच्' इति सूत्रे कुत्वं कस्मान्नभवतीति भाष्यप्रतीकमादाय । एवं क्त्वातुमुन् सूत्रेऽपि उद्योतव्याख्या[illegible] विमृष्टः ।

टित्वं-भत्वं-घुत्वमित्यादौ टि-घु-भादीनां व्यक्तीनां तत्तच्छक्यानामानन्त्यात् टि-घु-भादि पदमेव (आनुपूर्वी) प्रवृत्तिनिमित्तमिति तत्रैव त्वः । ततश्च भत्वमिति पदेन भसंज्ञोच्यते । कथितं हि भाष्ये – 'कुत्वं कस्मान्न भवति चोः कुः पदस्य । भत्वात् (भसंज्ञायाः सत्त्वत्) । कथं भसंज्ञा' इति । अनेन भाष्येण भत्व-भसंज्ञापदयोः पर्यायत्वं स्पष्टमेवाभिहितम् ।

**'वृद्धिरादैच्'** इति सूत्रे कौस्तुभे कुत्वमित्यत्र जातिविशेषः, व्यक्तिविशेषोपहिता सत्ता, शब्दस्वरूपं वा प्रवृत्तिनिमित्त[illegible] [illegible]त्रितयान्यतमत्वे त्वप्रत्यय इति दीक्षितैरगादि । आहुः च ते –

**सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता ।**

**संज्ञा शब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिः ॥ इति ।**

त्रयीशब्दानां प्रवृत्तिरिति (जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः) पक्षे कुत्वादिसंज्ञाशब्दानां जातिशब्देष्वन्तर्भावः । ततश्च कादिपञ्चवर्णेषु कुरित्यनुगतप्रतीतेः कादिनिष्ठा कुत्वाख्या जातिः त्वप्रत्ययेनाभिधीयते । तथा हि कोर्भावः कुत्वम्, कादिपञ्चस्वेव वर्तमानो धर्मविशेषः । कुत्वं कस्मान्नभवतीति प्रश्ने तु जात्याः उच्चारणकर्मासम्भवात् तयाक्षिप्तव्यक्तिविषयकः (ककारविषयकः) प्रश्नः पर्यवस्यति ।

शब्दार्थयोः भेदपक्षानुयायिनः अन्ये केचन संज्ञा – संज्ञिसम्बन्धे त्वप्रत्यय इति ब्रुवन्ति । शब्दार्थयोरभेदपक्षे अभेदस्य शाब्दिकनये सम्बन्धाभावात् सम्बन्धस्य प्रवृत्तिनिमित्तत्वाभावः । भेदपक्षे तु शब्दस्य कादिपञ्चवर्णात्मकार्थस्य च भिन्नत्वात् तत्र सम्बन्धः प्रवृत्तिनिमित्तत्वेन गृह्यत इति तादृशसम्बन्धे प्रत्यय इति तन्मतम् । किन्तु शब्दार्थयोः वाच्य – वाचकभावसम्बन्धाभ्युपगमात् अर्थे शब्दप्रयोगे सत्येव स च सम्बन्धः प्रतीयत इति पुनस्तदभिधाने (सम्बन्धाभिदाने) त्वप्रत्ययः नावश्यकः, उत्तर्थानामप्रयोगात् । अतः सम्बन्धे प्रत्यय इति यदुक्तं तत् चिन्त्यमेव । इति शम् ॥

## भारतीयसौन्दर्यशास्त्रम्

भाग्यलक्ष्मीः एच्. एम्.

शोधच्छात्रा

वेद एव परमं चरमञ्च प्रमाणमित्यङ्गीकुर्वतां भारतानां कृते वेद इव शास्त्राण्यपि प्रमाणानि । भगवद्गीतायां भगवता एवमुक्तम्–

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ इति ।**

तदनुसारं पुरुषार्थचतुष्टयस्य साधनार्थं प्रवृत्तानि शास्त्राणि प्रतिविषयं विलसन्ति–शब्दानां स्पष्टीकरणार्थं शब्द (व्याकरण) शास्त्रम्, पदार्थज्ञानार्थं न्यायाशस्त्रम्, यागादीनां विधानार्थं मीमांसाशास्त्रम्, आत्मस्वरूपविचारार्थं वेदान्तशास्त्रमित्यादिरूपेण । परन्तु कलाश्लाघ्येण भगवता अभित्तावेव निर्मितेऽस्मिन् जगच्चित्रेऽणुमप्यविहाय विलसत्सौन्दर्यं विवेचयितुं किञ्चन शास्त्रं सौन्दर्यशास्त्रनाम्ना कुतो न निबद्धमस्माकं शास्त्रकारैरिति महदाश्चर्यमनुभूयते । तेषां सौन्दर्यप्रज्ञा, नासीदिति न तदर्थः । तर्हि किं कारणं स्यात् ? इति जिज्ञासायां कारणद्वयमेवम् उहितुं शक्यते –

1. साहित्यशास्त्रापरपर्यायेऽलङ्कारशास्त्रे पर्याप्ततया सौन्दर्यविचारा वर्तन्ते । तदर्थं पृथग्रूपेण शास्त्रनिबन्धनस्यावश्यकता तैर्नानुभूता स्यात् ।

2. सौन्दर्यस्य सर्वत्रापि सत्त्वात् शिल्पशास्त्रादिषु तत्तच्छास्त्रसम्बद्धसौन्दर्यं तत्तच्छास्त्र एव वर्तत इति पृथग्रूपेण निबद्धं न स्यात् ।

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन 'आदर्शशोधसंस्थानम्' इति सम्मानितम्

# प्रज्ञा

पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका - ८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्, पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८
२०१३

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला - १११

प्रज्ञा - २०१३
पूर्णप्रज्ञसंशोधनमन्दिरशोधपत्रिका - ८

ISBN : 978-93-81275-32-0

मार्गदर्शकाः- प्रा. डि. प्रह्लादाचार्यः
प्रा. राधावल्लभ त्रिपाठी
प्रा. ए. हरिदास भट्टः

सम्पादकः- डा. ए.वि.नागसम्पिगे
उपसम्पादकः- डा. शङ्करनारायण अडिगः के.

प्रकाशकः- पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, डा. विश्वेशतीर्थस्वामीजीमार्गः
कत्तरिगुप्पमुख्यमार्गः, बेङ्गलूरु - २८

मुद्रितपुस्तकसङ्ख्या - ५००

पृ.सङ्ख्या - ८ + १५५

# लः कर्मणि च भावे चाकर्मकेभ्यः – एका समीक्षा

अर्चना कागन्
शोधच्छात्रः, रा.सं.स. श्रृंगेरी

इह जगति विवक्षितस्यार्थस्य प्रतिपादनाय वाक्यं प्रयुज्यते । तस्मिंश्च वाक्ये नामपदानि भवन्ति, क्रियापदानि च । नामादीनि च सुबन्तानि । सुप् च ङ्यन्तात् आबन्तात्- प्रातिपदिकाच्च भवति । गौरीत्यादयः ङ्यन्ताः । अजादयः आबन्ताः । सर्व-शिला-पाषाणादीनि राम-दाक्षिप्रभृतीनि च प्रातिपदिकानि । प्रातिपदिकत्वम् चैषां अर्थवदिति-कृत्तद्धितेति च सूत्रेण । अनर्थकानां 'तु' प्रभृतीनां तु निपातस्यानर्थकस्येति वार्त्तिकेनेति स्थितिः ।

क्रियापदं च तिङन्तं-कृदन्तं वा । एते च तिङः-कृतश्च धातोर्भवन्ति । तदुक्तं भाष्ये-'धातोः द्वये प्रत्ययाः तिङः-कृतश्चेति ।' तत्र तिङ्प्रत्ययाः परस्मैभाषा नव, आत्मनेभाषाश्च नवेति समवायेन अष्टादश । तत्र कृत्प्रत्ययाः कर्त्तरि-कर्मणि-करणे-सम्प्रदाने-अपादाने-अधिकरणे-भावे-स्वार्थे चेति अष्टस्वर्थेषु भवन्ति । तिङस्तु धातोः कर्त्तरि-कर्मणि-भावे च विधीयन्ते, नान्यस्मिन्नर्थे । तमिममर्थमुपस्थापयति-लः कर्मणीति शास्त्रम् । लः, कर्मणि, च, भावे, च, अकर्मकेभ्यः इति पदच्छेदः । वाक्यद्वयघटितमिदं सूत्रम् । लः इति प्रथमाबहुवचनान्तम् । चकारेण कर्तरि कृदिति सूत्रात् कर्तरीति पदमनुकृष्यते । धातोः इत्यधिकृतम् । लः कर्मणि चेति प्रथमं वाक्यम्। धातोः लकाराः कर्तरि-कर्मणि च स्युरिति तदर्थः । अकर्मकेषु कर्मणीत्यंशस्य बाधितत्वात्, भावे चेत्युत्तरवाक्येन तत्र विशेषविधानाच्च सकर्मकधातुविषयकमादिमं वाक्यम् । सकर्मकेभ्यः भावे लकारस्तु न भवति । देवदत्तेन घटं क्रियते इत्यादौ भावलकारेण कर्मणः अनभिहितत्वात् द्वितीयापत्तेः। भावे च अकर्मकेभ्यः इति द्वैतीयीकं वाक्यम् । अत्रापि चकारात् कर्त्रैवाकृष्यते, न तु कर्म असम्भवात् । ततश्च अकर्मकेभ्यः धातुभ्यः भावे-कर्तरि च लकाराः भवन्तीत्यर्थः वाक्यस्यास्य । यथा- सकर्मकात् पच्धातोः कर्तरि लकारे पचतीति, कर्मणि लकारे पच्यते इति रूपम् । अकर्मकवाचिनो भू धातोः कर्तरि लकारे भवतीति, भावे भूयते इत्यादिकं रूपम् ।

ननु 'स्वतन्त्रः कर्ता' इत्यादिनाऽनुशासनेन कर्त्रादीनामर्थानां विवरणेऽपि भावस्य अविवरणात् तदर्थः दुर्बोधः । तस्मात् भावो नामः कः इति चेदुच्यते । सत्तार्थकात् भू धातोः भावार्थे घञि भावशब्दस्य निष्पत्तिः । भवनमित्यर्थः । तच्च सकलधात्वर्थानां सामान्यव्यापार-वृत्ति । यथा-वृक्षत्वं चन्दन-चम्पकप्रभृतीनाम् । तथा च भावो नाम धात्वर्थ इत्युक्तं भवति ।

तदुक्तं-'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते' इति । क्रियावाची च धातुः । असौ क्रिया सर्वदाऽपि साध्यस्वभावा । साध्यत्वं च-क्रियान्तराकाङ्क्षानुव्यापकतावच्छेदकरूपत्वम् । लिङ्ग- सङ्ख्या-अनन्वयित्वमिति यावत् । सैव साध्यक्रिया प्रकृतसूत्रस्थेन भाव शब्देनाभीधीयत इति स्थितिः । प्रबन्धेऽस्मिन् पञ्चविचाराः प्रस्तूयन्ते । यथा-

१. लः इति प्रथमाबहुवचनम् ।

२. सूत्रन्यासविचारः ।

३. सकर्मकाकर्मकलक्षणपरिष्कारः ।

४. लकाराः वाचकाः उत द्योतकाः ।

५. आदेशानां वाचकत्वम् उत स्थानिनाम् । इति ।

## १. लः इति प्रथमाबहुवचनम्–

सूत्रेऽस्मिन् लः इति जातौ बहुवचनं, प्रथमान्तं च । लकारास्तु दश । यथा-

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा ।

विध्याशिषोऽस्तु लिङ्-लोटौ लृङ्-लृटौलुट् भविष्यति ॥

ननु लः इति अकारानुबन्धकयोः लङ्-लटोः सामान्यग्रहणं न, किन्तु उत्सृष्टानुबन्धकलकाराणां सामान्यग्रहणमिति विदितमेव । तत्र लः इति न जसन्तं, किन्तु षष्ठ्येकवचनान्तम् । लः परस्मैपदम् इतिवत् आदेशापेक्षया इयं षष्ठी । तथा च-तस्य स्थाने यः आदेशः सः सकर्मकात् कर्मणि-कर्तरि, अकर्मकात् भावे-कर्तरि चेत्यर्थः अस्तु । इति चेन्मैवम् ।

लः इत्यस्य षष्ठ्यन्तत्वे आदेशानामेवार्थ उक्तः स्यात् । सोऽपि तिबादीनामेव, न तु शत्रादीनाम्, तेषां द्विवचनादिसंज्ञाविरहात् । द्व्येकयोः-इत्यादिनाऽस्य सूत्रस्य एकवाक्यतायाः अभ्युपगमात् । किं च जसन्तत्वे श्रुतेनैव सम्बन्धः, षष्ठ्यन्तत्वे आदेश इति पदाध्याहारात गौरवम् । यदुक्तं षष्ठ्येकवचनपक्षे लुकोऽप्यर्थनिर्देश इति तदपि न, द्विवचनादिसंज्ञाविनिर्मुक्तस्य अभावरूपस्य अर्थादेशनस्यायुक्तत्वात् । ल इत्यस्य बहुवचनत्वोपपादने अन्या अपि युक्तयः वरीवर्तन्ते । तत्र हि लः कर्मणीति सूत्रे भाष्ये सूत्रवैय्यर्थ्यं सन्दिहानः भाष्यकारः इत्थमवोचत्- 'नैतदस्ति प्रयोजनम्, भावकर्मणोः आत्मनेपदं विधीयते, शेषात्कर्तरि परस्मैपदम् । एतावांश्च लकारः यदुत परस्मैपदं, आत्मनेपदं च । स चायमेवं विहितः' इति । सोऽयं लकारः

एवं लः कर्मणीति शास्त्रेण विहित इति तदभिप्रायः । अत्र स चायमिति कथयितुः पतञ्जलेः लः इत्यस्य प्रथमाबहुवचनान्तत्वमेवाभिप्रेतम् । अन्यथा षष्ठ्येकवचनान्तत्वे 'ते च इमे' इति वदेत्। एवमेव 'लग्रहणं सकर्मकनिवृत्त्यर्थम्' इति कात्यायनवचनमपि प्रथमान्तपक्षस्यौचित्यं द्रढयति। षष्ठ्यन्तत्वे तु 'ल इति ग्रहणम्' इति वार्तिकस्वरूपं स्यात् । ल इति ग्रहणम् लग्रहणमिति समासेऽपि विभक्तिलोपे अकारश्रवणानापत्तिः, विभक्त्यलोपे विसर्गश्रवणापत्तिश्च ।

## २. सूत्रे न्यासविचारः-

लकारः द्विविधः तिङ्भावी-अतिङ्भावी च । तत्र तिङ्भाविनः लकारस्य कृत्संज्ञानिषेधात् कर्तरि कृत् इत्यस्यानुपस्थानात् स्वार्थे-भावे च विधानं प्राप्नोति । अतिङ्भाविनस्तु कर्तरि कृदिति वचनात् कर्तर्येव साधुत्वं प्राप्नोति । ततश्चातिङ्भाविनोः शानच्-कानचोः कर्मणि साधुत्वं न स्यात्। अतः शास्त्रारम्भः ।

नन्विदं सूत्रं नावश्यकम् । तथाहि-अस्त्यस्मिन् सूत्रे भावकर्मणोः इति सूत्रेण भावकर्मणोरर्थयोः आत्मनेपदम्, शेषात्कर्तरि... इत्यनेन कर्तरि परस्मैपदं च विधीयते । एतावांश्च लः यदुत परस्मैपदं, आत्मनेपदं च । ततश्च पूर्वोक्ताभ्यां द्वाभ्यां सूत्राभ्यां लकारस्य भाव-कर्म-कर्तारः अर्थाः अनुमास्यन्त इति किमनेन सूत्रेण इति चेदाह-'लग्रहणं सकर्मकनिवृत्त्यर्थम्' यदीदं सूत्रं नारभ्येत तर्हि यथा भावे विधीयमानाः घञादयः सकर्मकेभ्यो भवन्ति ओदनस्य पाकः, सूत्रस्य कृतिरिति, तथा भावकर्मणोः इत्यनेन सकर्मकेभ्योऽपि भावार्थे लकाराः (आत्मनेपदप्रत्ययाः) स्युः । ततश्च 'पच्यते यवागू देवदत्तेन' इत्यादिप्रयोगाणां साधुत्वप्रसङ्गः । भावार्थे लकारविधानात् कर्मणः अनभिधानाद् द्वितीयापत्तिः । तन्मा-भूदित्येवमर्थमिदं सूत्रमारब्धम् । ततश्च सकर्मकेभ्यः कर्तरि-कर्मणि च लकारः, न तु भावेऽपीत्यदोषः ।

नन्वेवं सति 'अकर्मकेभ्यः भावे लः' इत्येव सूत्र्यताम् । अर्थात् भावकर्मणोरिति सूत्रानन्तरं अकर्मकेभ्यः भावे लः इति पाठः क्रियते । भावकर्मणोः इति सूत्रेण भावार्थे-कर्मार्थे चात्मनेपदं विधीयते । कर्मार्थता सकर्मकेभ्य एव सम्भवतीति भावार्थः अकर्मकधातूनामेव । तयोरात्मनेपदं प्रकृतसूत्रेण विधीयते । स्थिते चैवम् अकर्मकधातुभ्यः भावार्थे लकारः इत्यर्थ-बोधकम् 'अकर्मकेभ्यः भावे लः' इति सूत्रं व्यर्थं सत्- 'भावे अकर्मकेभ्य एव लकारः' इति नियमयति । ततश्च पूर्वोक्तदोषस्यानवसरः इति चेत् तदपि न 'अकर्मकेभ्यः भावे एव लः' इति विपरीतनियमापत्त्या कर्तरि तेभ्यः लकारानापत्तेः । तस्मात् भावे चेति चकारः आवश्यकः । स च कर्मणः असम्भवात् कर्तुः समुच्चायक इति नोक्तदोषः ।

न चैवं 'भावे चाकर्मकेभ्यः' इत्येवास्त्विति वाच्यम् । भावे इव कर्त्तरि अपि अकर्मकेभ्य एवेति नियमापत्तेः । ततश्च सकर्मकेभ्यः धातुभ्यः भावे इव कर्तर्यपि लकारानापत्तिः स्यात् ।

नन्वेवमपि 'लश्च भावे चाकर्मकेभ्यः' इति न्यासो अस्तु । अर्थात् भावकर्मणोः इत्युत्तरमेवं सूत्र्यताम् । चकारेण कर्तरीत्यनुकृष्यते । ततश्च लकाराः सकर्मकेभ्यः कर्तरि स्युः, अकर्मकेभ्यः भावे-कर्तरि च स्युरित्यर्थः पर्यवस्यति । कर्मणि तु ज्ञापकात् लकाराः भविष्यन्ति। अर्थात् भावकर्मणोरिति सूत्रे कर्मणीति कर्मार्थकलकारानुवादेन तिङ्विधानरूपज्ञापकात् कर्मणि लकाराः सिध्यन्तीति किमनेन कर्मणीति पदेन इति चेन्मैवम्- 'तयोरेव कृत्यक्तखलर्थाः' इत्युत्तरसूत्रे तयोरित्यनेन कर्मणोऽपि परामर्शार्थं तस्यावश्यकत्वात्, ज्ञापकानुसरणक्लेशस्य वैय्यर्थ्याच्च । तस्मात् यथान्यासमेव युक्तम् ।

## ३. सकर्मकाकर्मकलक्षणपरिष्कारः–

सूत्रेऽस्मिन् भगवता पाणिनिना भावे चाकर्मकेभ्य इत्युक्तम् । किं नाम अकर्मकत्वं सकर्मकत्वं वेति जिज्ञासायामुच्यते- स्वार्थव्यापारव्यधिकरणफलवाचकत्वम् अथवा स्वार्थफल-व्यधिकरणव्यापारवाचकत्वं वा- सकर्मकत्वम् । स्वं-धातुः, तस्यार्थः फलं, तस्मात् व्यधिकरणं-भिन्नाश्रयत्वं यस्य व्यापारस्य तद्वाचकत्वं सकर्मकत्वमिति तदर्थः । स्वार्थव्यापारसमानाधि-करणफलवाचकत्वं-अकर्मकत्वम् । भूधातोः सत्तात्मकफलस्य तदनुकूलव्यापारस्य च एकाधिकरणत्वादकर्मकत्वम् । पच्-धातोः विक्लित्तिरूपफलस्य - तदनुकूलव्यापारस्य च भिन्नाश्रयत्वात्सकर्मकत्वमिति लक्षणसमन्वयः ।

तदुक्तं हरिणा-

"फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोः धर्मिभेदे सकर्मक उदाहृतः ॥" इति ।

फल-व्यापारयोरेकाधारसंस्थिते अकर्मकत्वेन, तयोराश्रयभेदे सकर्मकत्वेन व्यवहारः । ननु फल-व्यापारयोरेकनिष्ठतायामकर्मकत्वमिति कथिते गम्यादीनामप्यकर्मकतापत्तिः । उत्तरदेशसंयोगरूपफलस्य-तदनुकूलव्यापारस्य च चैत्रनिष्ठत्वादिति चेन्मैवम्-एकनिष्ठतायामित्यस्य एकमात्रनिष्ठतायामित्यर्थः । एकतरावृत्तित्वे सति एकवृत्तित्वं एकमात्रनिष्ठत्वम् । तथा च संयोगरूपफलस्य देवदत्तरूपव्यापाराधिकरणभिन्न-ग्रामादिवृत्तित्वात् गमेः नाकर्मकतापत्तिः ।

आत्मानं जानातीत्यत्र ज्ञानरूपफलस्य ज्ञानजनकव्यापारस्य च कर्तृनिष्ठत्वात् एकाधिकरणत्वरूपाकर्मकलक्षणसमन्वयेऽपि ज्ञा धातुः सकर्मक एव । यतो ज्ञा-धातुस्थले

एकत्वेऽप्यात्मनः, शरीर-अन्तःकरणरूपोपाधिभेदमाश्रित्य द्वावात्मानौ अभ्युपेयेते । ततश्च शरीरोपाध्यवच्छिन्नात्मनः कर्मत्वं, अन्तःकरणोपाध्यवच्छिन्नात्मनः कर्तृत्वमुररीकृत्य भिन्नाधि-करणत्वरूप-सकर्मकत्वमुपपादनीयम् । 'अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति' इति कर्मवत्कर्मणा तुल्यक्रियः इति सूत्रस्थभाष्यमत्र प्रमाणम् ।

नागेशस्तु पूर्वोक्तलक्षणस्य गुरुत्वात् 'अध्यासिता भूमयः' इत्यादौ अव्याप्तेश्च' शब्द-शास्त्रीयकर्मसंज्ञकान्वय्यर्थकत्वं सकर्मकत्वम्, तदनन्वय्यर्थकत्वमकर्मकत्वमिति लक्षणं बभाण । तेन पूर्वोक्तलक्ष्ये अव्याप्तेरनवसरः । तथा हि-अध्यासिता भूमयः इत्यत्र अधिशीङ्स्थासां कर्म इति सूत्रेण आधारस्य भूमेः कर्मसंज्ञाविधानात्, तदर्थेन सह धात्वर्थस्यान्वयसत्वात्, धातोः सकर्मकत्वात् कर्मणि निष्ठाप्रत्ययः सेत्स्यति । नन्वेवं जीवतीत्यस्य प्राणान् धारयतीत्यर्थेन शब्दशास्त्रीयकर्मसंज्ञक-प्राणपदार्थान्वय्यर्थकत्वात् जीवत्यादावपि सकर्मकत्वातिव्याप्तिरिति चेदाह-अन्वयपदेनेह पृथक्पदजन्यप्रतीतिविषययोरर्थयोः आकांक्ष्याभास्यसंसर्गः ग्राह्यः । तेन जीवत्यादेः प्राणधारणस्य पृथगुपस्थित्यभावात् धात्वर्थतावच्छेदकतैव उपस्थितेर्न दोषः । ध्वनितं चेदं-सुप आत्मनः क्यच् इति सूत्रे भाष्ये ।

## ४. लकाराः वाचकाः उत द्योतकाः

शास्त्रे णिच्-सनादयः केचन प्रत्ययाः वाचका एव, यङ्-तरप्-तमबादयः द्योतका एवेति व्यवस्थापितम् । लडादयस्तु वाचका द्योतका वा स्युः, पक्षद्वयस्याप्याकरे प्रतिपादनात् । तत्राऽदौ द्योतकत्वपक्षः विचार्यते लडादीनां द्योतकत्वम् अर्थात् स्वसमभिव्याहृतधातुनिष्ठशक्तु-द्बोधकत्वम् । गच्छ-अतृणोट्-अजर्घाः इत्यादौ विनापि प्रत्ययं वर्तमानत्वादेः भानेन, तत्र तादृशकालवाचित्वस्य धातोरावश्यकत्वेन पचतीत्यादावपि तथात्वस्य न्याय्यतया, प्रत्ययस्य द्योतकत्वमेव युक्तम् । अन्यथा लुप्तप्रत्ययस्थले प्रत्ययानां द्योतकत्वं, शतृप्रत्ययस्थले वाचकत्वमिति वैषम्यं स्यात् ।

क्रियारूप एव कालः, नातिरिक्तः । तथा च क्रियासामान्यवाचकस्य धातोः कालरूपक्रियाविशेषे लक्षणा स्वीक्रियते । तत्रैव लडादिस्तात्पर्यग्राहकः । न चैवं शक्तत्वं-द्योतकत्वं चेति वृत्तिद्वयस्वीकारे सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायः व्याकुप्येत खलु इति चेन्न । विशिष्टे लक्षणास्वीकारे तन्न्यायस्य प्रवृत्त्यभावात्, गङ्गायां मीनघोषौ इत्यादौ यथा । न च पायादित्यादौ प्रेरणायाः लिङ्वाच्यत्वस्यावश्यकतया लकाराणां वाचकत्वमेव युक्तमिति वाच्यम् । तत्रापि प्रेरणायाः धातुवाच्यत्वाभ्युपगमेन प्रत्ययस्य द्योतकत्वस्वीकारात् । इदं द्योतकतावादिनः मते ।

अन्ये आचार्यास्तु एवमवोचन् यत्-तिप्रत्ययश्रवणवेलायां वर्तमानकालप्रतीतिः, स्यति प्रत्ययश्रवणवेलायां भविष्यत्कालप्रतीतिः, तदश्रवणे न प्रतीतिरिति अन्वय-व्यतिरेकाभ्यां प्रत्ययस्यैव वाचकत्वं सिध्यति । न हि प्रत्ययमश्रुत्वा केवलधातुमात्रश्रवणवेलायां कालः प्रतीयते । अत एव लः कर्मणीति सूत्रेण कर्तरि-कर्मणि-भावे च लकारविधानं, वर्तमाने लट् इत्यादिभिः शास्त्रैः कालविशेषे लकारविधानं च सङ्गच्छते । 'यस्मिन्नर्थे यः प्रत्ययः विहितः स तस्यार्थः' इति वचनात् लकाराणां कर्त्राद्यर्थाः वाच्या एव । अन्यथा शक्तिग्राहकयोः अन्वय-व्यतिरेकयोः सतोरपि द्योतकत्वस्वीकारे प्रत्ययानां वाचकत्वकथैव उच्छिद्येत । ननु वाचकत्वपक्षे येन नाप्राप्तिन्यायेन सामान्यस्य कर्त्रर्थस्य विशेषेण वर्तमानत्वाद्यर्थेन बाधः स्यात्, किं च लः कर्मणीति शास्त्रेण कर्तरि लकारविधानवैय्यर्थ्यापत्तिश्चेति चेन्मैवम् शक्यतावच्छेदकभेदात् लत्वेन कर्त्रादिवाचकतायाः, लट्-त्वादिना वर्तमानत्वादिवाचकतायाः स्वीकारात् ।

वस्तुतस्तु द्योतकत्वपक्ष एव न्यायसम्मतः । यद्यपि लः कर्मणीति न्यासेन कर्तरि लकारविधानसामर्थ्यात् वाचकतापक्ष एव सिद्धान्तभूत इति भाति । तथापि वाचकतापक्षे वर्तमानत्वादेः प्रत्ययार्थतया प्राधान्यापत्तिरिति तद्वारणाय 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानम्' इति नियमे सङ्कोचः करणीय इति गौरवात् द्योतकतापक्ष एव ज्यायान् । द्योतकत्वपक्षे प्रकृतिप्रत्ययौ... इत्यादि नियमे सङ्कोचस्तु न । हेतुमति च, स्त्रियाम् इत्यादिसूत्रस्थ भाष्यप्रामाण्यात् द्योत्यार्थस्य विशेषणत्वदर्शनाच्च तादृशनियमस्य वाच्यार्थविषयकत्वमित्यभ्युपगमात् । किञ्च कुत्सिते, बहुषु बहुवचनम् इत्यादि सूत्रेषु भाष्ये 'फल-व्यापार-काल-संख्या-कारके इति पञ्चकं धात्वर्थः' इति पक्षस्य सिद्धान्तितत्वेन लकाराणां द्योतकत्वपक्ष एव भाष्यसम्मतः । किन्तु तत्र इयान् सङ्कोचः कर्तव्यः-तिङ्भावी लकारः द्योतकः, कृद्भावी लकारस्तु वाचक एवेति ।

## ५. आदेशानां वाचकत्वमुत स्थानिनाम्

लः कर्मणीति शास्त्रेण कर्तृ-कर्माभिधायी लकार इति सुष्ठु ज्ञातः । परं 'उच्चारितः शब्दः प्रत्यायकः नानुच्चारितः' इति न्यायेन उच्चरिते तिङि लोकप्रसिद्धा बोधकतारूपा शक्तिः ज्ञायते । लकारादौ तु काल्पनिकी शक्तिः । लकारस्तु शास्त्रप्रक्रियामात्रनिर्वाहिका, न तु लोकोपयोगी । विषयप्रत्यक्षसाधनानां चक्षुरादीनामिन्द्रियाणां स्वविषयेषु रूप-रस-गन्ध-स्पर्शादिषु यथा अनादिकालिकी योग्यतारूपासक्तिः तद्वत् शब्देषु अर्थग्रहणे काचित् शक्तिर्भवति । सैव बोधकतारूपा शक्तिः । सा च शक्तिः तिप्निष्ठा । तादृश-अर्थविषयकबोधजनकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्तरि-कर्मणि चानेन विधीयन्ते । अत एव कर्तृ-कर्मणी आख्यातार्थे इति शाब्दिकानामुद्घोषः । एवञ्च बोधजनकताशक्तिः श्रूयमाणेषु

वर्णेष्वेव प्रामाणिकैर्व्यवस्थापिता, न तु अश्रूयमाणेषु लकारादौ । तदुक्तं-'साधुशब्दे अन्तर्गता हि बोधकाः न तु तत्स्मृताः' इति । साधुशब्देषु लादयः न वाचकाः, किन्तु पचति-भवति इत्यादिप्रयुज्यमानपदेषु तिप्-विसर्गादयो वाचका इति तदर्थः ।

ये तु दर्शनान्तरीयाः एवमाहुः प्रयोगसम्प्रविष्टाः तिप्-विसर्गादयः न वाचकाः । तेषामादेशानां बहुत्वेन शक्त्यानन्त्यापत्तेः, एधाञ्चक्रे, ब्रह्म इत्यादौ आदेशलुगादेः अभावरूपस्य बोधकत्वासम्भवाच्च । किन्तु तैरादेशैः स्मृताः ये लकारादयः, स्वादयश्च स्थानिनः न तु वाचकाः । यद्यपि स्थानिनः लकारस्यापि कालरूपार्थभेदेन लट्-त्वलिट्त्वादिभिः शक्त्यानन्त्यं, तथापि दशसु लकारेष्वनुगतरूपेण भासमाना लत्वादिरूपजातिः सर्वस्मिन् लकारे तिष्ठतीत्यतः तत्र शक्ततावच्छेदकत्वे लाघवम् । किञ्च लः कर्मणीत्यनुशासनेन कर्तृ-कर्मणि लकारविधानात् स्थानिनामर्थानुशासनं प्रमाणितमिति । तदयुक्तम् -

सूत्रभाष्यविरोधात् । यद्यपि शब्दतः आदेशानामर्थवत्त्वं पाणिनिना नैव बोधितं तथापि 'स्थानेऽन्तरतमः' इति सूत्रप्रणयनेन, 'तस्थस्थमिपां तान्तन्तामः' इत्यत्र 'एकस्य एकार्थः, द्व्यर्थस्य द्व्यर्थः, बह्वर्थस्य बह्वर्थो यथा स्यादित्युक्त्वा यदर्थाभिधानसमर्थः स तस्यादेशः' इति प्रयोजनं प्रदर्शयता भाष्यकृता च आदेशानामर्थवत्त्वं स्पष्टमेवाभिहितम् । किञ्च प्रयुक्तानामिदमन्वाख्यानमित्यतः प्रयोगमवलोक्यैव शास्त्रं समुदभवदिति प्रयोगगतानां वाचकत्वमङ्गीकार्यम् ।

॥ इति शम् ॥

सन्दर्भग्रन्थाः


१. भूषणसारः ।
२. लघुमञ्जूषा ।
३. परमलघुमञ्जूषा ।
४. प्रौढमनोरमा । (सशब्दरत्नसहितम्)
५. लघुशब्देन्दुशेखरः ।
६. महाभाष्यम् ।
७. वाक्यपदीयम् ।


प्रमाणवचनम्

एतल्लेखनं भावपदार्थविमर्शपूर्वकं तत्सम्बद्धसूत्रस्थवार्तिकानां समीक्षात्मकमध्ययनम् इति विषयसम्बद्धम् वर्तते । अपिच अन्यत्र अप्रकाशितम् इति सप्रमाणम् उद्घोष्यते ।

* * * * * *

ॐ

ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# journal of
# Veda Saṁskṛta Academy

**A National Refereed Research Journal**

मूल्याङ्कित–राष्ट्रिय–संशोधन–पत्रिका

**Volume : II**
**June to Dec. 2013**

*Edited by the Director :*
**Dr. Gopalkrishna Hegde**
Jyotishashastra-Dharmashastra Vidwan

**Veda Samskrta Academy (R.)**
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN – 2250-1711

# 'भावे सर्वलिङ्गो निर्देशः' इति वार्त्तिकसमीक्षा

– विदुषी पि.आर्.अर्चना कारन्त *

"भावे"[१] इति सूत्रस्थं वार्त्तिकमिदम् । तथा हि घञ्प्रत्ययविधायके भावे इति सूत्रे 'भावे' इति पुल्लिङ्गेन-एकवचनान्तेन च निर्देशः कृतः । भावो नाम सिद्धावस्थापन्नः धात्वर्थः । तत्र कर्तरि कृदिति वचनात् घञादीनां कर्तरि प्राप्तौ भावे इत्यर्थो निर्दिश्यते । प्रकृते घञ्प्रत्ययविधेः प्राधान्यात् भावरूपः अर्थः गुणीभूत इति गुणे लिङ्गसंख्यायाः विवक्षायां यथाश्रुतस्य पुंस्त्वरूपस्य लिङ्गस्य, एकत्वसंख्यायाश्च विवक्षायां स्त्रीनपुंसकेति लिङ्गान्तरे, द्विबह्वोश्च भावप्रत्ययाः न प्राप्नुवन्ति ।

शब्देन योऽर्थः प्रतिपाद्यते तदर्थाभिधायकेन भाव्यम् । भाव इति शब्देन यादृशः सिद्धावस्थापन्नः यल्लिङ्गसंख्यायुक्तः अर्थः उपस्थाप्यते तद्वाचक एव सः इत्यतः तस्य लिङ्गान्तर -वचनान्तरानभिधायकत्वम् । ततश्च "स्त्रियां क्तिन्"[२] इत्यत्र भावे – स्त्रियामित्येतयोः सामानाधिकरण्यासम्भवात् स्त्रियां भावे क्तिन्प्रत्ययो न स्यात्, अर्थान्तरे कर्मादावेव(अकर्तरि कारके) स्यात् । भावे तु पुंसि क्तिन् प्रसज्येत ।

तद्वत् "नपुंसके भावे क्तः"[३] इत्यत्रापि भावे इति सूत्रे श्रुतेन शब्देन नपुंसके इत्यस्य अन्वयायोगात् कर्तरि कृदिति वचनात् संनिहितं कर्तरीतिपदं नपुंसकग्रहणेन विशेष्यते । अकर्तरि च कारके इत्यस्य त्वत्रासम्भवः । ततश्चानेन नपुंसके कर्तरि क्तः स्यात् । भावे तु पुंसि । एवं भावे द्वित्वबहुत्वयोः पाकौ पाकाः इत्यादौ प्रत्ययाः न स्युः ।

---

१ अष्टाध्यायी सूत्रम् ३-३-१८ २ अ. सू. ३-३९४
३ अ.सू ३-३११४

---

* (विदुषी पि.आर्.अर्चना कारन्त महाभागा शृङ्गेरिस्थे राष्ट्रियसंस्कृतसंस्थाने राजीवगान्धिपरिसरे व्याकरणविभागस्य सहायकप्राध्यापकानां डा. चन्द्रशेखरभट्ट महाभागानां मार्गदर्शनेन "पाणिनीये भावपदार्थविमर्शपूर्वकं तत्सम्बद्धसूत्रस्थ- वार्तिकानां समीक्षात्मकमध्ययनम्" इत्यस्मिन् विषये संशोधनकर्मणि रता ।)

अत आह कात्यायनः भावे सर्वलिङ्गो निर्देशः इति । वचनेऽस्मिन् लिङ्गग्रहणस्योपलक्षणार्थत्वात् संख्यापि गृह्यते । ततश्च भावे इत्यत्र भूतौ – भवने – भावे - भावयोः सर्वलिङ्गसंख्यानां निर्देशः कर्तव्यः । कृते सति सर्वस्मिन्नपि लिङ्गे, द्विवचनबहुवचनयोश्च प्रत्ययाः सेत्स्यन्तीत्यर्थः ।

वार्त्तिकस्य वैयर्थ्यं स्वयं कात्यायनेन 'नात्र निर्देशस्तन्त्रम्' इति वार्त्तिकान्तरप्रणयनेनाभिहितम् । नञः तन्त्रपदार्थेऽन्वयः । अत्र निर्देशः न तन्त्रं (अतन्त्रं) इति समन्वयः । तथा च भावे इति निर्देशे लिङ्गवचनमतन्त्रं – अविवक्षितमित्यर्थः । यद्यपि यथाजातीयकमर्थं (पुल्लिङ्गं,एकवचनसहितं) उपादातुं समर्थः भावशब्दः तथाजातीयकेऽर्थे (पुल्लिङ्गैकत्वसंख्यारूपे भावे) प्रत्ययः भवितुं युक्तः अथापि उपात्तयोस्तयोः लिङ्गसंख्ययोरतन्त्रत्त्वात् सर्वलिङ्गसंख्यायोग्यः प्रातिपदिकसामान्यनिमित्तः भावशब्दः प्रत्ययनिमित्तत्वेनोपादीयते । तदेवात्र प्रधानं, न लिङ्गं नापि वचनम् । तस्मात् सर्वत्रापि लिङ्गवचनेषु प्रत्ययः सिध्यतीति सर्वलिङ्गसंख्यानिर्देशस्य कर्तव्यता नास्ति । भाष्यवाक्यपदीयादिग्रन्थपरिशीलनेन ज्ञायते यत् प्रकृतसूत्रे लिङ्गसंख्ययोरविवक्षायां हेतुपञ्चकं विद्यत इति । ते च यथा –

- उपात्तयोः लिङ्गसंख्ययोः नान्तरीयकत्वात् । (तयोरविवक्षा)
- लिङ्गभेदानां संख्याभेदानामनुमेयत्वात् ।
- निर्देशे चरितार्थत्वात् ।
- भवत्यर्थस्य उपमानसदृशत्वात् ।
- भावे इत्यत्र सन्मात्रस्य सामान्यस्य विवक्षणात् । इति ।

१. भावे इति निर्देशे नान्तरीयकत्वात् लिङ्गसंख्यमतन्त्रमिति प्रथमः हेतुः । तयोः नान्तरीयकत्वं कुत इति चेत् काशिकायां पदमञ्जरीकारेणेत्थमभाणि –

न विना लिङ्गसंख्याभ्यां सत्त्वभूतोऽर्थ उच्यते ।<br>
इत्यतन्त्रमुपादानं तयोर्न तु विवक्षितम् ॥<br>
धान्यार्थिनामुपादानं पलालादेर्यथा मतं ।<br>
शब्दसंस्कारमात्रं तु तन्निर्देशप्रयोजनम् ॥[४]

---

४ पदमञ्जरी, भावे ३-३-१८

भावशब्दस्य कृदन्तत्वात्, कृदभिहितस्य सत्त्वभावापन्नत्वात् स चार्थो लिङ्गसंख्याभ्यां विना निर्देष्टुमशक्य इति तयोः लिङ्गसंख्ययोः शब्देनोपादानमिति तयोरविवक्षैव । न च लिङ्गसंख्यारहितं भाव इति प्रातिपदिकसामान्यं निर्दिश्यतामिति वाच्यम्, "न केवला प्रकृतिः प्रयोक्तव्या नपि प्रत्ययः" इति वचनविरोधात् । एवञ्चावश्यं कयाचिद्विभक्त्या लिङ्गेन च भाव्यमिति शब्दसंस्कार एव पुंस्त्वैकत्वयोरुपादानस्य प्रयोजनम् ।

अत्रार्थे भाष्यकाराः लौकिकं दृष्टान्तमित्थं ददिरे तद्यथा – "कश्चिदन्नार्थी शालिकलापं सतुषं सपलालमाहरति, नान्तरीयकत्वात् । स यावदादेयं तावदादाय तुषपलालान्युत्सृजति । तथा कश्चिन्मांसार्थी मत्स्यान् सशकलान् सकण्टकानाहरति नान्तरीयकत्वात् । स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति । एवमिहापि नान्तरीयकत्वात् पुल्लिङ्गेन निर्देशः क्रियते एकवचनान्तेन च । न ह्यत्र निर्देशस्तन्त्रम्"[५] इति । ननु मत्स्यादौ कण्टकादीनामनुपयोगात् त्यागः युक्तः, इह तु लिङ्गसंख्ययोः त्यागे हेत्वभावः इति श्रुतयोः लिङ्गसंख्ययोरविवक्षायां प्रमाणाभाव इति चेन्न–प्रयोगमूलत्वात् व्याकरणस्मृतेः, प्रयोगे च सर्वस्मिन् लिङ्गे संख्यायाश्च भावार्थकप्रत्ययानां दर्शनादिह तयोरविवक्षा । अत एवोक्तं व्याकरणनिकाये "सूत्रे लिङ्गवचमतन्त्रम्"[६] इति ।

२. क्रियासामान्यरूपार्थबोधके 'भावे' इति निर्देशे लिङ्गादि भेदानामनुमेयत्वात् तेषामविवक्षा । उक्तं हि –

सामान्ये भाव इत्यत्र यल्लिङ्गमुपलभ्यते ।
भेदानामनुमेयत्वान्न तत्तेषु विवक्ष्यते ॥ इति ।[७]

लिङ्गमिति संख्याया अप्युपलक्षणम् । क्रियासामान्यबोधके भावे इति निर्देशे यल्लिङ्गं पुंस्त्वरूपं, एकत्वरूपा संख्या चोपलभ्यते ते उभेऽपि तन्निर्देशे अविवक्षिते, लिङ्गभेदानां संख्याभेदानामनुमेयत्वात् ।

---

[५] महाभाष्यम्, भावे ३-३-१८
[६] परिभाषेन्दुशेखरः
[७] वाक्यपदीयम्, क्रियासमुद्देशः श्लो.सं.५९

तथा हि "निर्विशेषं न सामान्यम्" इति न्यायः(विशेषरहितस्य सामान्यस्य अभाव इत्यर्थः) । ततश्च सामान्यनिर्दे विशेषाः(लिङ्गसंख्यादयः प्रकृते स्त्री-नपुंसक, द्वित्व-बहुत्वादिकाः) अनुमीयन्ते । तत्र यदि उपात्तयोः लिङ्गसंख्ययोः पुंस्त्वैकत्वयोः विवक्षा, तर्हि अन्येषां लिङ्गसंख्यादीनां तत्रासम्भवात् लिङ्गसंख्याविशेषानुमापक प्रमाणविरोधः स्यात् ।

किञ्च "कृभ्वस्तयः क्रियासामान्यवचनाः"[८] इति वचनानुसारेण भावे इत्यत्र भवतिना भूधातुना क्रियासामान्यार्थकेनार्थः निर्दिश्यते । स च सर्वधात्वर्थक्रियाविषयकः कृतो भवति ।

एवं पाकादिक्रियाविशेषानुसारं स्त्रियां भावे, नपुंसके भावे इति भावसामानाधिकरण्यान्यथानुपपत्त्या(पुंस्त्वविशिष्टभवत्यर्थाश्रयणे सामान्यं नैव सम्भवति) तद्गतं लिङ्गसंख्योपादान- मतन्त्रमिति ज्ञापयति । एवञ्च भावे इति क्रियासामान्य- निर्देशात्, लिङ्गसंख्याभ्यां विना तस्य निर्देष्टुमशक्यत्वात् नान्तरीयकं पुंस्त्वैकत्वं तत्रोपात्तम् । तत्र क्रियासामन्येन पाकादिक्रियाविशेषरूपाणामाक्षेपात् सन्निधानमिति क्रिया- विशेषमनुसृत्य भावे इत्यत्र सर्वलिङ्गसंख्यापरिग्रहः ।

३. निर्देशे चरितार्थत्वाद्वा लिङ्गसंख्ययोरविवक्षा । ननु भाव इत्यत्र क्रियासामान्यचोदनायां "निर्विशेषं न सामान्यम्" इति न्यायेन तस्य विशेषे पर्यवसानात् पाकः, त्यागः, रागः इत्यादौ पाकादिक्रियाविशेषाणां घञादिप्रत्यये सत्यपि भावे इत्यत्र श्रुतं पुंस्त्वं कथं वा परित्यज्यते श्रुतार्थहानौ मानाभावादिति चेदत्रोच्यते – धात्वर्थस्य भावस्य साध्यत्वेन लिङ्गसंख्या- राहित्येऽपि प्रातिपदिकार्थस्य सिद्धत्वेन सत्त्वभूतस्य भावस्य लिङ्गसंख्याराहित्यस्यासम्भवात् तन्निर्देशे लिङ्गसंख्योपादान- मावश्यकम् । ततश्च भावे इति शब्दोच्चारणाय चरितार्थयोः तयोः पुंस्त्वैकत्वरूपलिङ्गसंख्ययोः अन्यत्र प्रत्ययविधाव- विवक्षा । यथा पलालादयः धान्यार्थमुपात्ताः चरितार्थाः कार्यपरिसमाप्तौ तु त्यज्यन्ते तद्वत् लिङ्गसंख्येऽपि कार्यविधौ परित्यज्येते । तस्मात् लिङ्गान्तरे संख्यान्तरे च प्रत्ययाः भवन्त्येव ।

-----------------------------

८ महाभाष्यम्, भावे ३-३-१८

४. भवत्यर्थस्य उपमानसदृशत्वात् तद्गतलिङ्गसंख्ययोर विवक्षा । तथाहि घञादिप्रत्ययविधौ पुंस्त्वैकत्वरूपोपाधि -रहितः भावार्थः निमित्तम् । स च भावार्थः अत्र उपमानसदृशः, धातुसामान्यात् घञादिप्रत्ययविधानात् । उपमाप्रयोगश्चेत्थं "यथा भवतेर्भावः तथा पचतेः पाकः, यजतेर्यागः, त्यजतेस्त्यागः प्रत्ययार्थः" इति । भावे इत्यत्र तत्पदं द्विरावर्त्यते । आवृत्तं प्रथमपदं षष्ठ्यन्ततया(पञ्चम्यर्थेऽयं षष्ठी) विपरिणम्यते । स च भू धातुपरः, द्वितीयस्त्वर्थपरः । यथा भूधातोः भावे (भूधात्वर्थक्रियासामान्ये सिद्धस्वरूपविशिष्टे) घञि 'भाव' इति रूपं, तद्वत् सर्वधातुभ्यः भावे घञ्प्रत्ययः भवतीति सूत्रार्थः । तात्पर्यतः निरुपाधेः भावार्थस्यात्र स्वीकारात् विभिन्नलिङ्गवचनेषु क्रियासामान्यवाचिभ्यः धातुभ्यः घञादिप्रत्ययाः भवन्तीत्यर्थः फलति ।

नन्वत्र भावार्थस्योपमानत्वं निगदितं, परं यथा भावस्तथा पक्तिः, तथा पाकाः इत्यादौ भाव – पक्त्योः, भावः – पाकाः इत्यनयोश्च भिन्नलिङ्गवचनयोः दर्शनात् कथमनयोः उपमानोपमेयभावः इतिचेत् मैवं भिन्नलिङ्गवचनयोरपि उपमानोपमेयभावस्यालङ्कारिकै र्निदर्शितत्वात् ।[१]

५. भावे इति सूत्रे सन्मात्रस्य सामान्यस्य विवक्षणाद्वा अदोषः । पूर्वं तु धात्वर्थक्रियासामान्ये प्रत्ययविधानात् "निर्विशेषं न सामान्यम्" इति न्यायेन तस्य च सर्वव्यक्तिविषयतात्पर्यात् लिङ्गसंख्ये अतन्त्रे इत्युपपाद्य पक्तिः – पाकाः इत्यादौ घञादयः संसाधिताः । इदानीं तु भावे इत्यत्र पुंस्त्वैकत्वयोर्विवक्षायामप्यदोष इत्युच्यते । तथाहि भावे इत्यत्र भाव इत्यनेन सत्तासामान्यं – सत्त्वभावरूपसिद्धत्वाख्यः धर्मः उच्यते । पचादिक्रियाविशेषेषु भिन्नलिङ्गसंख्यानुगतेऽष्वपि इदं सामान्यं(भावशब्दवाच्यं) भवत्येव । तच्चैकं, पुंस्त्वानुगतश्च । तादृशसामान्यमाश्रित्य प्रत्ययाः विधीयन्ते भावे इति सूत्रेण । एवञ्च सामान्यस्य महाविषयत्वात् सर्वविशेषस्वीकारसामर्थ्यात् पक्तिः-पचनं-पाकः-पाकौ-पाकाः इत्यादिषु सर्वलिङ्गसंख्येषु विशेषेषु

---

[१] हंसीव धवलः चन्द्रः सरांसीवामलं नभः - इति चित्रमीमांसा

प्रत्ययसिद्धिर्भवति । एवञ्च लिङ्गसंख्ययोर्विवक्षा यामपि न दोषः ।

नन्वेवं सति पुंस्त्वैकत्वानुगतसामान्यवाचिनः भा शब्दस्याङ्गीकारे पक्तिरित्यादावपि पुंस्त्वापत्तिरिति चेन्न विशेषगतसामान्यस्य सिद्धत्वरूपार्थवाचकस्य भावशब्दस्य पुंस्त्वैकत्वयो सत्त्वेऽपि तदाश्रयविशेषस्य पाकादेः नानालिङ्गत्वात् स्त्रीत्वादेः उपपत्तेः ।

तथा च भावः सामान्यं, पचादयो विशेषाः इति पर्यवसितम् तदुक्तं भाष्ये – "अथवा कृभ्वस्तयः क्रियासामान्यवाचिनः क्रियाविशेषवाचिनः पचादयः । यच्चात्र पचतेर्भवतिर्भवति न तद्भवतेः पचतिर्भवति । यच्च भवतेः पचतिर्भवति न तत्पचतेर्भवतिर्भवति । कि पचतेर्भवतिर्भवति, सामान्यं । किञ्च भवतेः पचतिर्भवति विशेषः"[१०] इति प्रकृतभाष्यस्यायमर्थः यथा पचतेः भवतिः सामान्यं भवति, तथा भवते पचतिः सामन्यं न भवति । यथा भवतेः पचतिः विशेषः भवति तद्व पचतेः भवतिः विशेषः न भवति । ततश्च भवतिः सामन्यमेव, पचति विशेष एवेति तात्पर्यम् ।

ननु सामान्यानुगतेषु विशेषेषु प्रत्ययविधानाङ्गीकारे भवनं – भूति इत्यादौ प्रत्ययाः न स्युः, भवतेः विशेषावाचकत्वात् इति चेन्मैवं – भूति-भवनमित्यादौ पाकादिवत् स्त्र्यादिभेद सद्भावात् कर्त्रादिकारकभेदा तेषामपि विशेषत्वात् । विशेषाश्च ते सिद्धत्वरूपभावसामान्यानुगता इति प्रत्ययः उपपद्यते । एवञ्च स्वरूपे विशेषाभावेऽपि लिङ्गविशेषात् कारकविशेषाच्च विशेषत्वं तेषाम् ।

ननु भावे इति सूत्रे भावशब्देन सिद्धस्वभावकृ क्रियासामान्यमभिधीयते । तच्च पुंल्लिङ्गे वर्तते । निर्विशेषं...... इति न्यायेन सामान्येऽपि विशेषधर्मसद्भावात् पाकः – भोगः – त्यागः इत्यादौ क्रियासामान्ये पुंसि प्रत्ययस्य सिद्धत्वेऽपि पक्तिः इत्यादौ स्त्रि पचनमित्यादौ क्लीबे कथं भावप्रत्ययः इति चेदुच्यते – भावशब्दाभिधे सकलधात्वर्थनिष्ठसिद्धत्वविशिष्टः सामान्यरूपः सत्ताख्यः अर्थ कैश्चिच्छब्दैः केनचित्प्रकारेणाभिधीयते ।

---

१० महाभाष्यम्, भावे ३-३-१८

यथा भावः, भवनं, सत्ता इत्यादिसामान्यशब्दैः सामान्यरूपेण, पाकः, रागः इत्यादिविशेषपदैः विशेषरूपेण । यदा विशेषपदैः सः अभिधीयते तदा विशेषानुसारं लिङ्गादीन्यपि भिद्यन्ते । सत्ताख्यः अर्थः व्यक्तिविशेषोपाश्रयवशात् पक्तिः-पचनं-पाकः इति शब्दभेदेनोच्यते । तद्वत् स्त्रीत्वादीनि लिङ्गान्यपि सत्ताख्यस्य भावस्य भिद्यन्ते इत्यतः अदोषः ।

एवञ्च सर्वासु विशेषव्यक्तिषु अनुगतं, व्यापकं, सत्ताख्यं सामान्यं सर्वत्र स्वकार्यं(घञादिप्रत्ययविधिं) सम्पादयति । तच्च सामान्यं स्वगतलिङ्गेन संख्यया वा न नियम्यते, तयोः नान्तरीयकत्वात् । नापि विशेष्यस्य लिङ्गेन संख्यया वा नियम्यते, महाविषयत्वात्सामान्यस्य, विशेषस्य सामान्यस्वीकारे असामर्थ्याच्च । सामन्यं हि विशेषं आत्मसात्करोति, न तु विशेषः सामान्यम् । अतः सामान्यं येन केनापि न, नियम्यत इति सर्वत्रापि घञादयः सिध्यन्ति । एवञ्च एक एव सत्ताख्यः अर्थः पाकः, त्यागः, पाकाः, पक्तिः इत्यनेकरूपत्वेन प्रतिभासते ।

अमुमर्थं लौकिकदृष्टान्तेन हरिरेवं व्याजहार –

**आचार्यो मातुलश्चेति यथैको व्यपदिश्यते ।**

**सम्बन्धिभेदादर्थात्मा स विधिः पक्तिभावयोः ॥** इति ।[११]

यथा एक एवार्थः कञ्चित् प्रत्युपाध्यायः कञ्चित्प्रति मातुलो व्यपदिश्यते तद्वत्सैव प्रकारः पक्तिभावयोः बोद्धव्यः । भाष्येऽप्युक्तं "उपाध्यायस्य शिष्यो मातुलस्य भागिनेयमाह उपाध्यायं भवानभिवादयतामिति । स गत्वा मातुलमभिवादयते । तथा मातुलस्य भागिनेय उपाध्यायस्य शिष्यमाह मातुलं भवानभिवादयतामिति । स गत्वा उपाध्यायमभिवादयते"[१२] इति ।

स्वगताधिश्रयणादारभ्य अधःश्रयणपर्यन्तव्यापारकला पापेक्षया सामान्योऽपि पचत्यर्थः भावं प्रति विशेषभावमापन्नः । यथा उपाध्यायशब्देन मातुलतया अनभिहितोऽपि मातुलः वस्तुगत्या मातुलत्वात् अभिवादनकर्मतां प्रतिपद्यते तद्वत् सामान्यवाचिना भावशब्देन अकथितोऽपि विशेषः सामान्यगतविशेषानुमानसामर्थ्यात् सन्निहितो भवतीति सामान्यप्रयुक्तं घञादिप्रत्ययरूपं कार्यं लभते ।

---

११ वा.प. क्रियासमु. श्लो.सं.६३

१२ महाभाष्यम्, भावे ३-३-१८

यथा उपाध्यायादन्यः मातुलः न तथा सत्ताख्यात् भावादन्यत् पचिक्रिया अस्ति, सामान्यविशेषयोरत्यन्तभेदा भावात् । ततश्च सविशेषमेव सामन्यं न तु निर्विशेषम् विशेषपरिहारेण सामान्यरूपाभावात् विधिः विशेषेषु प्रवर्तते । परं विशेषप्रयुक्तस्तु सामन्ये न भवति, विशेषस्य सामान्य स्वीकारे असामर्थ्यात् ।

तथा च भावे इत्यस्य सूत्रार्थः कैयटेनैवं निरटङ्कि – "भवतौ धात्वर्थ वाच्यत्वेनावस्थितं यत् सामन्यं पचादिधातु वाच्यविशेषसामान्यं तत् प्रत्ययार्थः, तदर्थे घञ् भवति" इति । यथा "गौरनुबन्ध्यः....." इत्यादि सामान्यचोदनायां विशेषेषु कार्यं भवति, एवं भावशब्दवाच्यसामान्योपलक्षितेषु विशेषेषु प्रत्ययाः प्रवर्तन्ते । ते च विशेषाः द्वित्व – बहुत्वयुक्ताः, लिङ्गत्रययुक्ताश्चेति वचनत्रयं लिङ्गत्रयञ्चोपपद्यते । परं तत्रेयान् विशेषः पुंस्त्वविशिष्टे विशेषे विवक्षिते घञादिर्भवति, स्त्रीत्वविशिष्टे विशेषे क्तिन्नादिः, नपुंसकविशिष्टे विशेषे ल्युडादिः । स्त्रियां भावे इत्यादौ एकार्थसमवाया सामानाधिकरण्यमुपपद्यते । एकस्मिन्विशेषे भावशब्दवाच्यं सामान्यं स्त्रीत्वञ्च समवेतम् । ततश्च स्त्रियां क्तिन्निति सूत्रस्यायमर्थः - भावसामन्यानुगते विशेषे क्तिन्भवतीति । एवमेव नपुंसके भावे क्त इत्यादावप्यर्थः वर्ण्यः । तथा च सर्वार्थसिद्धिः ।

विदुषी पि.आर्.अर्चना कारन्त(आचार्य
शोधच्छात्रा (व्याकरणशास्त्र)
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय)
राजीवगान्धीपरिसरः शृङ्गेरी-५७७ १३१
चिक्कमगळूर, कर्नाटक
Phone - 0948107477
Email – archanakaranth6@gmail.com

## ग्रन्थसूची –


1. वाक्यपदीयम् (अम्बाकर्त्रीव्याख्यासहितम्)।
2. कैयटोद्योतसहितं पातञ्जलमहाभाष्यम् ।
3. न्यास-पदमञ्जरी सहिता काशिका ।
4. शब्दरत्नसहिता मनोरमा ।
5. लघुशब्देन्दुशेखरः ।
6. सिद्धान्तकौमुदी ।


---♣♣♣♣---

सत्यं ज्ञानमनन्तम्

# Journal of Veda Saṁskṛta Academy

**Recognised in the UGC-CARE List**

**A National Peer-Reviewed Research Journal**

विश्वविद्यालय–अनुदान–आयोगेन केर सूच्यां मानिता

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

**Volume : XIX**

**January to June - 2022**




॥ पातु विश्वं महाबलः ॥ – श्रीक्षेत्र गोकर्ण, कर्नाटक


*Edited by the Director :*

**Dr. Gopalkrishna Hegde**

Jyotishashastra-Dharmashastra Vidwan

**VEDA SAMSKRITA ACADEMY (R.)**

Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Volume XIX : January to June – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# शब्दस्य सामर्थ्यद्वयनिरूपणम्

**Dr. P. R. Archana Karanth**
Guest Lecturer, Dept. Of Vyakarana
Karnataka Sanskrit University
Chamaraja Pete-560018, Bengaluru, Karnataka
Ph no. – 9481904228
e-mail – archanakaranth6@gmail.com

यथा श्रुतिभिः ब्रह्मतत्त्वस्य जगत्कारणत्वं निरूपितं तद्वत् "वागेवार्थं पश्यति वाग्ब्रवीति वागेवार्थं निहितं सन्तनोति । वाग्येव विश्वं बहुरूपं निबद्धं तदेतदेकं प्रविभज्योपभुङ्क्ते"1, "ओमित्येकाक्षरं ब्रह्म"2, "ओमिति ब्रह्म, ओमितीदं सर्वम्"3 इत्यादि वाक्यैः ब्रह्मणः शब्दरूपतायाः प्रतिपादनात् शब्दब्रह्मैव जगत्कारणम् । तथा ह्ययं नामरूपात्मकः दृश्यमानः संसारः अखण्डशब्दतत्त्वस्य विवर्तः इत्यामाम्नायविदः विदुः । तथा च प्रसिद्धा ह्येषोक्तिः –

**सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥4**

अर्थादितत् जगदादौ कर्तृपारतन्त्ररहितेभ्यः अपौरुषेयेभ्यः वेदेभ्यः अजायत इति । वेदानाञ्च शब्दरूपत्वात् शब्दादुत्पत्तिरिति सिद्धम् । महाभारतस्य शान्तिपर्वणि पाराशरिरप्येवमुदाजहार -

**अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः ॥5**

जगति विद्यमानानि चराचरवस्तूनि शब्दः अर्थश्चेति द्वेधा विभज्यते । यावदर्थप्रपञ्चस्य विस्तीर्णता तावदेव शब्दप्रपञ्चस्यापि । अर्थप्रपञ्चस्तु बहुभिः दार्शनिकैः नैकेषु दर्शनेषु विभिन्नप्रकारैर्विमर्शितः । शब्दप्रपञ्चस्तावत् शब्दशास्त्रमात्रेण विव्रियते, विस्तीर्यते च । एकमर्थं बोधयितुमनेके शब्दाः प्रयुज्यन्त इति शब्दानामेवाधिकत्मत्वम् । अत एव हरिः स्वस्मिन्वाक्यपदीयग्रन्थे अद्भुतमिति नाम्ना शब्दशास्त्रं शंसति यथा – "वैखर्या मध्यमायाश्च पश्यन्त्यश्चैतदद्भुततम्"6 इति । यद्यपि वैयाकरणैः शब्देति जेगीयमानः स्फोटाख्य एव तथापि सः वक्तृबुद्धिमात्रगोचरः, सूक्ष्मप्राणवृत्त्यनुगतः, अरूपः, अखण्डः, प्रकृतिप्रत्ययविभागरहित इत्यतः प्रक्रियानिर्वाहाय स्फोटाख्यशब्दोपलब्धये च वैखरीवागुररीकृता । परश्रोत्रविषयः, साध्वसाधुविषयः, प्रकृतिप्रत्ययविभागसहितः यः वैखर्याख्यः शब्दः तमाश्रित्येयं विचारसरणिः प्रवर्तते ।

अर्थप्रत्यायनाय हि शब्दप्रयोग इति विदितमेव । गवादिशब्दानां यदि सास्नादिमद्व्यक्तिबोधने एव सामर्थ्यं तर्हि गामुच्चारयेति लोके, राज्ञो यत् इति शास्त्रे च, अर्थे कार्यस्य बाधात् निरुक्तवाक्यानामप्रामाण्यं स्यात् । अतः शब्दोऽपि शाब्दबोधे भासत इति पक्षः वैयाकरणैरङ्गीकृतः । शब्दः स्वस्य रूपमर्थात् आनुपूर्वी-स्वरूपं बोधयदर्थमुपस्थापयतीति स्थितिः । एते एव शब्दस्य विशिष्टे द्वे शक्ती ग्राह्यत्वं – ग्राहकत्वञ्चेति । ग्राह्यः नाम प्रकाश्यः, ग्राहकः नाम प्रकाशकः । हरिणा इमे शक्ती तेजो दृष्टान्तेनेत्थं न्यरूपि –

**ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानां एते पृथगिव स्थिते ॥7**

---

1. प्राचीनोक्तिः ।
2. भगवद्गीता ८/१३ ।
3. तैत्तिरीयोपनिषद्, शिक्षावल्ली ।
4. मनुस्मृतिः १/२१ ।
5. महाभारतम्, शान्तिपर्व २३९/५६
6. वाक्यपदीयम्, ब्रह्मकाण्डम् १४२ ।
7. वाक्यपदीयम् ब्रह्मकाण्डम्, ५५ ।

यथा तेजसः स्वरूपप्रकाशकत्वेन स्वयं प्रकाश्यत्वं, घटादेः प्रकाशकत्वञ्चेति द्वे सामर्थ्ये तथैव सर्वेषां शब्दानां स्वेन स्वस्य ग्राह्यत्वं, अर्थग्राहकत्वं चेति द्वे शक्ती स्तः । ते उभेऽपि वस्तुतः अभिन्नेऽपि बुद्धिभेदेन भिन्ने इव भासेते । घटादयो हि विषयाः इन्द्रियजन्यज्ञानेन प्रकाश्याः एव भवन्ति, न तु स्वस्य परस्य वा प्रकाशकाः । चक्षुरादीनि ज्ञानकरणादीनीन्द्रियाणि परस्य घटादेः ज्ञानजननेन ग्राहकाण्येव, न तु स्वयं ग्राह्याणि भवन्ति । एवं ज्ञानविषये ग्राह्यत्वं, ज्ञानकरणे ग्राहकत्वं सिद्धम् । परं तेजसि प्रकाश्य – प्रकाशकत्वभावश्चेत्युभयमप्युपलभ्यते यथा तथा शब्देऽपि । न च एकस्मिन्नुभयस्वीकारे कर्तृ – कर्मभावविरोधः शङ्क्यः, लोकप्रसिद्धत्वात् । किञ्च अन्येन दृष्टान्तेनाप्येतदुपपादयितुं शक्यते । यथा – ज्ञाने ज्ञेयरूपम्, आत्मस्वरूपमुभयमपि प्रत्यक्षीक्रियते, तथा शब्देऽपि अर्थरूपं – सास्नादिमद्व्यक्तिः, स्वरूपं – स्वकीयं तत्तद्वर्णानुपूर्वीरूपमित्युभयमपि शाब्दबोधे विषयीक्रियते । तथा हि शब्दानां अर्थे शब्दे(स्वरूपे) च खण्डशः शक्तिः स्वीकार्या । तत्रोभयोः विशेष्य – विशेषणभावे कामचारः । यत्रार्थे कार्यस्य सम्भवः तत्र अर्थः विशेष्यः, शब्दः विशेषणम् । यथा गामनय इति । यत्र च बाधः तत्र शब्द एव विशेष्यः । यथा राज्ञो यत् । अत्रार्थे **"स्वं रूपम् शब्दस्याशब्दसंज्ञा"**8 इत्यनुशासनम्, "घट इति शब्दः, घट इत्यर्थः, घटमुच्चारय, घटमानय" इत्याद्यनुभवाश्च मानम् ।

शब्दः स्वरूपं बोधयन्नेवार्थं बोधयति । तत्र स्वरूपबोधस्य प्राथम्यमेवमुपपाद्यते – प्रयोगकर्तुः बुद्धिः शब्दोच्चारणात्पूर्वं शब्देष्वेव प्रवर्तते - अस्यार्थस्य वाचकः अयं शब्द इति । एवञ्च सः अर्थबोधनेच्छया प्रथमं शब्दं जानाति, पश्चादुच्चारयति । तद्वत् वक्तुरिव बोधृणां व्यवसायः(प्राथमिकबोधः) तेष्वेऽव शब्देषु जायते, न त्वर्थे, शब्दाधीनत्वादर्थबोधस्य । एवं वक्तुः श्रोतुश्च शब्द एव प्रथमं बुद्धिविषयो भवतीति शब्दस्य स्वरूपबोधपूर्वकार्थबोधकत्वं स्पष्टम् । तत्र लोके अर्थः विशेष्यः, शास्त्रे शब्दः विशेष्य इति विवेकः ।

ननु यदि शब्दस्य स्वरूपग्राहकत्वमप्यस्ति तर्हि लोके अर्थवत् शब्दतः प्रतीयमानस्य स्वरूपस्यापि क्रियान्वयः स्यात् । गामानयेत्यादावर्थस्य यथा क्रियान्वयः, तथा शब्दस्याप्यन्वयः किं न स्यादिति चेदाह – स्वरूपस्य विशेषणत्वात् इतरव्यावर्तकतया सफलत्वात् क्रियायामन्वयाभावः । यथा गोशब्दस्य जात्यादिविशिष्टसास्नादिमति पिण्डे शक्तिः । जात्यादयः शब्दवाच्याः सन्तोऽपि विशेष्यभूतेऽर्थे सास्नादिमति पिण्डविशेषे प्रकारीभूता इति आनयनादि क्रियान्वयं नैव प्राप्नुवन्ति, तद्वत् शब्दः वाच्यः सन्नपि विशेष्यभूतार्थबोधनेन तत्र गुणीभूत इति तस्य परार्थत्वात् क्रियायामनन्वयित्वं, मानाभावात्, फलाभावाच्च । एकस्मिन्नर्थे प्रकारतयोपस्थितस्यार्थस्य अन्यत्रान्वयस्याव्युत्पन्नत्वात् । विशेष्यस्तु क्रियान्वयमन्तरा अचरितार्थः सन् क्रियान्वयी । परं गवादिशब्दात् जात्यादेः प्रकारतयैवोपस्थितिः, न तु विशेष्यतया इति न ते कदापि दर्शनानयनादि क्रियान्वयं भजन्ते । शब्दस्य खण्डशः शक्तिस्वीकारात् विवक्षावशात् तस्य कदाचित् विशेष्यतयोपस्थितिरिति विवेकः ।

ननु अनुभवकरणं यथा इन्द्रियं तथा शब्दोऽपि । तथा च शब्दस्य यथा बोधविषयत्वं तद्वदिन्द्रियस्यापि बोधविषयो कुतो नेत्याशङ्कायामाह – शब्दानां गृहीतानामेव ज्ञानकरणत्वमिति हेतोः कदाचित् शब्दस्य स्पष्टोच्चरणाभावे दूरे कलरवे वा उच्चारिते तस्यानिर्ज्ञातस्वरूपे सति 'किमाह भवान्' इति प्रश्नः समुपलभ्यते । अज्ञातशब्दानामर्थज्ञानकरणत्वे प्रश्न एव नोत्पद्येत, शब्दज्ञानं विनैवार्थज्ञानसम्भवात् । यथा शब्दः स्वरूपेण गृहीत एवार्थस्य प्रकाशकः, तथार्थे ग्राह्ये सतीन्द्रियाणां स्वरूपं प्राङ्नैव गृह्यते । इन्द्रियाणि स्वरूपेण अगृहीतान्येव सत्तामात्रेणार्थग्राहकाणि, लोके तथा दर्शनात् । एवञ्च यत्र स्वतो ग्राह्यत्वाभावः तत्र वस्तून्यगृहीतान्येवार्थ-प्रकाशकानि । तथा च शब्दानां स्वरूपं ग्राह्यं सत् ग्राहकम्, इन्द्रियाणां स्वरूपमग्राह्यं सत् ग्राहकमिति स्थितिः । शब्दस्य ग्राह्यत्व – ग्राहकत्वशक्ती ये पूर्वमुपवर्णिते ते उभेऽपि क्वचित्शास्त्रीयकार्येषु बुद्धिपरिकल्पितभेदेन पृथक् क्रियेते । ग्राह्य – ग्राहकत्वरूपशब्दधर्मावपोधृतौ । वस्तुतः अभिन्नावपि बुद्धिपरिकल्पितपृथक्भावौ ।

---

8. पा. सू., १/१/६८ ।

अत एव भिन्नतया ज्ञातौ तौ पदार्थौ संज्ञा – संज्ञिरूपभेदप्रयुक्तकार्येषु अविरोधेन कारणत्वं प्राप्नुतः । निगदितं हि हरिणा –

**भेदेनावगृहीतौ द्वौ शब्दधर्मावपोद्धृतौ । भेदकार्येषु हेतुत्वमविरोधेन गच्छतः ॥** [9]

लोके शास्त्रे च भिन्नयोरेव संज्ञासंज्ञिभवः दृश्यते । लोके व्यक्तिविशेषे सङ्केतितः देवदत्तादिशब्दानुपूर्वी संज्ञा । तस्मादन्यः पिण्डविशेषः संज्ञी । शास्त्रेऽपि सङ्केतितः गुणवृद्ध्यादिशब्दः संज्ञा, तस्मादन्यः अदेङ् – आदैजाद्यर्थः संज्ञी । एवञ्च संज्ञासंज्ञिभावस्य भिन्नेष्वेव प्रसिद्धेः एकस्मिन्विरोधात् "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति सूत्रेण एकस्मिन्नेव शब्दे बोधकरूपत्वेन संज्ञात्वम्, बोध्यरूपत्वेन संज्ञित्वं यद्यपि नोपपद्यते, तथापि लक्ष्यलक्षणघटकत्वेनाभिन्नेऽपि शब्दे उपाधिकृतं भेदमादाय संज्ञासंज्ञिभावः उपपादनीयः । ततश्च "**अग्नेर्ढक्**"[10] इत्यत्र लक्षणघटकः अग्निशब्दः संज्ञा, लक्ष्यघटकः संज्ञी । एकस्मिन्नेव शब्दे रूपद्वयकल्पनं तु "राहोः शिरः" इतिवत् ।

अत्रार्थेऽयं दृष्टान्तः – यथा संज्ञासूत्रघटकाः वृद्धिगुणादयः शब्दाः संज्ञा – संज्ञिसम्बन्धग्रहात्पूर्वं स्वानुपूर्वीस्वरूपबोधकाः सन्तोऽपि, आदैच्पदबोधितैः स्वसंज्ञिभिः अकारादिभिः संज्ञा-संज्ञिभावरूपसम्बन्धं यान्ति, तथाऽयं विधिसूत्रघटकः अग्निशब्दः स्वरूपबोधकोऽपि सूत्रघटकाग्निशब्दवाच्यया प्रयोगघटकाग्निशब्देन साकं संज्ञासंज्ञिभावसम्बन्धमेति । उक्तं तावत् ब्रह्मकाण्डे हरिणा –

**वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः । आदैच् प्रत्यायितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिः ॥**

**अग्निशब्दस्तथैवायां अग्निशब्दनिबन्धनः । अग्निश्रुत्यैति सम्बन्धं अग्निशब्दाभिधेयया ॥**[11]

इत्थञ्चेऽह शास्त्रे संज्ञासूत्रेण, संज्ञाशब्दात् क्वचिद्भिन्नरूपाणि, क्वचिदभिन्नरूपाणि संज्ञिनः बोध्यन्ते । परमिदमत्रावधेयम् – "अग्नेर्ढक्" इत्यादिसूत्रे प्रयुज्यमानानामग्न्यादिशब्दानां ढगादिकार्यभाक्त्वाभावः । तेषां स्वरूपपरकत्वात्, प्रयोगस्थस्य प्रत्यायकत्वात्, लक्ष्यस्थशब्दान्तरबोधनेन परतन्त्रत्वाच्च । किन्तु ततः अन्ये लक्ष्यघटकाः अग्न्यादिशब्दाः एव कार्यान्वयभाजः । एषा एव रीतिः "गोपयसोर्यत्"[12], "पक्षात्तिः"[13] इत्यादि शास्त्रेष्वप्यूह्या ।

ननु विधिसूत्रोपात्ताग्निशब्दस्य बोध्यार्थपरतन्त्रत्वात् ढगादिकार्याप्रसक्तिर्यथा तथा प्रयोगघटकाग्निशब्दस्यापि लोके अङ्गारकाद्यर्थबोधनायोच्चरितत्वात् तस्यापि पारतन्त्र्यात् कार्ययोगाभावः खलु इति चेन्न – अभिधेयभावेन समवस्थितशब्दस्योच्चारणपरतन्त्रत्वे समानेऽपि तस्मिन् धर्मान्तरस्य पृथग्भानात् । उपमानोपमेयभावसिध्यर्थं नूनं कश्चन समानधर्मो आश्रीयते । तावता न तयोः सर्वथा भवत्यभेदः, येन सादृश्यात् तयोः सर्वव्यवहारः अभिन्न एव भवेत् । तथा प्रकृते विधिसूत्रस्थाग्निशब्दस्य प्रयोगस्थस्य च उच्चारितत्वरूपसामान्यधर्मस्य तुल्यत्वेऽपि, विधिसूत्रस्थस्य बोधकत्वेन प्रकारतायाः, प्रयोगघटकस्य तु बोध्यत्वेन विशेष्यतायाः सत्त्वेन धर्मभेदोऽप्यस्ति । ततश्च कस्यचित् कार्ययोगः, कस्यचिन्नेति व्यवस्थोपपद्यते । सर्वांशेऽभेदे दृष्टान्तदार्ष्टान्तिकभाव एवोच्छिद्येत, भेदे सत्येव तत्कल्पनात् । अतो प्रयोगस्थस्य कार्यान्वयाभावः नाशङ्कनीयः ।

"अग्नेर्ढक्" इत्यादौ शब्दाः यथा स्वरूपबोधकाः तथा शक्तिग्राहकवाक्येऽपि(संज्ञाशास्त्रे) संज्ञाशब्दाः स्वरूपार्थबोधकाः । तथाहि – संज्ञाशब्दस्य भवत्यभिधेयद्वयम् । प्रथमं श्रोत्रग्राह्यं स्वकीयं रूपम् । द्वितीयं तदतिरिक्तं चक्षुरादिग्राह्यं बाह्यम् । तत्र सङ्केतग्रहकाले संज्ञाशब्दः संज्ञाशास्त्रे स्वरूपार्थकः । तत्र प्रमाणं तस्माद्विभक्त्युत्पत्तिः । सङ्केतग्रहात्प्राक् संज्ञाशब्दः संज्ञिनं बोधयितुमक्षमः, सङ्केतग्रहाभावात् ।

9. ब्र. का., ५८ ।
10. पा. सू., ४/२/३३ ।
11. ब्र. का., ५९/६० ।
12. पा. सू., ४/३/१६० ।
13. पा. सू., ५/२/२५ ।

एवं स्थिते सः यदि स्वरूपमपि न बोधयेत् तर्ह्यर्थवत्त्वाभावेनाप्रातिपदिकत्वात् प्रथमा न स्यात् । द्वितीयार्थस्तु बाह्यः व्यक्त्यादिः संज्ञी, सङ्केतग्रहानन्तरं बोध्यते । यदा बाह्यार्थः बोध्यते तदा स्वरूपार्थः तस्मिन् प्रकारतया गम्यते । तत्र सङ्केतग्रहकाले संज्ञाशास्त्रेण संज्ञासंज्ञिनोः प्रत्यक्षभेदमपाकृत्य संज्ञिनि संज्ञास्वरूपाध्यवसाये सोऽयमित्यभेदारोपे स्वरूपेणार्थवत्वात् उभयत्र (संज्ञाशब्दे, संज्ञिशब्दे च) प्रथमा । ततश्च **"आदैच् पदाभिन्नं वृद्धिपदम्"** इति बोधः । यदा तु **'अस्यायं वाचकः'** इति शब्दार्थयोः भेदः व्यपदिश्यते तदा संज्ञासंज्ञिनोर्भेदात् संज्ञिशब्दात् षष्ठी, संज्ञाशब्दात् प्रथमा विधीयते । यथा **"उञः प्रगृह्यम्"**[14] ।

सर्वान्त्येऽयं प्रश्नः जागर्ति यत् – शब्दस्य नित्यत्वे सदा तस्य सत्ता भवत्येव । स्थिते चैवं शब्दस्यानुच्चारणे, अश्रुतायां वा कुतोऽर्थबोधः न जायत इति चेदत्रोच्यते – बोधविषयत्वमप्राप्तैः अज्ञातस्वरूपैः शब्दैरर्थः नैव प्रतीयते । यतो हि ते च शब्दाः अज्ञातस्वरूपाः अनुच्चारिताः देशान्तरे वा उच्चारिताः केवलं हृदये सत्तामात्रेणार्थानां बोधकाः न भवन्ति । अपि तु स्वयं सम्यक् ज्ञाता एव शब्दाः अर्थबोधकाः । एवञ्चानुभवबलात् गृहीतः(ग्राह्यः) सन्नेव शब्दः ग्राहको भवतीति शब्दस्य सम्बलितं शक्तिद्वयमुपपन्नं भवतीति शम् ॥

सन्दर्भग्रन्थाः –

१. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रह्लाद' टिप्पणीसहितः, चौखम्बा कृष्णदास अकादमी ।

२. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुल्लसितम्, चौखम्बा संस्कृत प्रतिष्ठानम् ।

३. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्बा संस्कृत प्रतिष्ठानम् ।

४. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी व्याख्याभ्यां समन्विता) मोतीलाल् बनारसीदास ।

५. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः ।

६. वाक्यपदीयम् (ब्रह्मकाण्डम्), 'प्रतिभया' व्याख्यया समन्वितम्, आचार्य पं. सत्यनारायण खण्डूडी, चौखम्बा कृष्णदासकादमी

७. ವಾಕ್ಯಪದೀಯ (ಅನುವಾದ ಸಹಿತ), ಮಹಾಮಹೋಪಾಧ್ಯಾಯ ವಿದ್ವಾನ್. ಎನ್. ರಂಗನಾಥಶರ್ಮಾ, ಕರ್ನಾಟಕ ಸಂ. ವಿಶ್ವವಿದ್ಯಾಲಯ

**********

---

14 पा. सू. १/१/१७ ।

Impact Factor : 6.240

ISSN 2349-364X

# वेदाञ्जलि Vedanjali

अन्तर्राष्ट्रीय विद्वत्समीक्षित षाण्मासिकी शोधपत्रिका

*(International Peer Reviewed Refereed Journal of Multidisciplinary Research)*

वर्ष-९ अंक-१७, भाग-१ जनवरी-जून, २०२२

प्रधान सम्पादक

डॉ० रामकेश्वर तिवारी

सह सम्पादक

श्री प्रसून मिश्र

प्रकाशन : वैदिक एजूकेशनल रिसर्च सोसाइटी, वाराणसी

# भावक्रिययोर्द्वैविध्यनिरूपणम्

**Dr. P. R. Archana Karanth***

**भावः पदार्थसत्तायां क्रियाचेष्टात्मयोनिषु। विद्वल्लीलास्वभावेषु भूत्यभिप्रायजन्तुषु** ॥[1] इति नानार्थरत्नमालाख्यकोशे भावशब्दस्य नानार्थाः उपदर्शिताः। उत्पत्त्यर्थकात् भूधातोः **हेतुमति च**[2] इति णिचि, **णेरनिटि**[3] इति णिलोपे भावशब्दः निष्पद्यते। तथाहि उत्पत्त्यनुकूलव्यापारः भावशब्देन विवक्ष्यते अर्थात् धात्वर्थरूपा क्रिया एव भावः। तदुक्तं भाष्ये - धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयत इति। कौमुद्यां दीक्षितैरप्यगादि - भावो भावना उत्पादना क्रिया[4] इति।

तथा च **भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि**[5] इति निरुक्ते यास्कः। नामाख्यातोपसर्गनिपाताश्चेति चतुर्विधं पदं निर्दिश्य नामाख्यातयोर्लक्षणं प्रवक्तुमिमे वाक्ये तेनाभिहिते। आख्यातं-तिङन्तं, भावः-क्रिया। भाव्यते अनेनेति करणव्युत्पत्त्या, भूयतेऽसाविति कर्मव्युत्पत्त्या उभयोः फलव्यापारयोस्तेन ग्रहणम्। शाब्दबोधे तिङन्तानि क्रियाप्रधानानि, सुबन्तानि द्रव्यप्रधानानि भवन्तीति तदर्थः। तदुक्तं निरुक्तभाष्ये दुर्गाचार्येण - 'भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य, तत्र भावः प्रधानम्'[6] इति। प्रकृते भावशब्देनोभयोर्ग्रहणात् कर्मणि प्रयोगे फलस्य प्राधान्यमित्यप्यर्थः सेत्स्यति।

भावः क्रियेत्यनर्थान्तरमित्यनुपदमेव निरूपितम्। परं **भूवादयो धातवः** इति धातुसंज्ञाविधायके शास्त्रे **णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने**[7] इत्यात्मनेपदविधायकसूत्रे, **कर्मवत्कर्मणा तुल्यक्रियः**[8] इति कर्मवद्भावविधायकसूत्रे च भावक्रिययोः परस्परम् अर्थविभिन्नता भाष्यकारैः प्रोक्ता। एतदन्यत्र स्थले भाव-क्रिया इति शब्दाभ्यां सपरिस्पन्दापरिस्पन्दसाधारणः धात्वर्थः परिगृह्यते। अत एव **उपसर्गप्रादुर्भ्यामस्तिर्यच्परः**[9] इति सूत्रे भाष्ये **न ह्यस्तिः क्रियावचनः** इति पूर्वपक्षिणा कथिते **कः पुनराह नाऽस्तिः क्रियावचनः इति। क्रियावचनोऽस्तिः** इत्यभिदधुः भाष्यकाराः[10]। तदाशयमुपवर्णयन्कैयटः[11] प्राह – 'परिस्पन्दरूपस्यैवार्थस्य क्रियात्वात्, अस्तेः तदभावात् संशयः। समाधानं तु कर्मस्थभावकानां कर्मस्थक्रियाणाञ्चेति कर्मवद्भावविधायक-सूत्रादन्यत्र क्रियाशब्दः धात्वर्थमात्रवृत्तिपरः (अपरिस्पन्दसपरिस्पद-सर्वसाधारणः)। अस्त्यादौ तादृशक्रियायाः सत्वात् क्रियावचनत्वं तस्याक्षतम्। कर्मवत्सूत्रे तु भाव-क्रिययोः भेदेनोपादानात् परिस्पन्दलक्षणविशिष्टः क्रियाशब्दः समाश्रीयते' इति।

तथा हि सपरिस्पन्दसाधनसाध्यः धात्वर्थः क्रिया, सपरिस्पन्दापरिस्पन्दसाधनसाध्यः धात्वर्थः भाव इति तयोर्वैलक्षण्यम्। परिस्पन्दः-चेष्टा, साधनं-कारकं, तच्च सन्निहितत्वात् कर्तृकारकमेव, परिस्पन्दस्य चेतनधर्मत्वात् कर्तर्येव तस्य सम्भवात्। चेष्टादि-परिस्पन्दसहितेन कर्त्रा साध्यः धात्वर्थः क्रियेति भण्यते। परिस्पन्दरहितेन परिस्पन्दसहितेन च कर्त्रा साध्यः धात्वर्थः भावः। यथा पाकः, दर्शनम्। तत्र पाकादिस्थले देवदत्तादौ कर्तरि चलनादिरूपपरिस्पन्दादेर्दर्शनात् तेन साध्यः धात्वर्थः क्रियेत्याख्यायते। दर्शन-श्रवणादौ तादृशपरिस्पन्दादेरदर्शनात् तत्र कर्त्रा साध्यः धात्वर्थः भावः। यद्यपि दर्शने चक्षुरुन्मीलनादिरूपस्पन्दनं वर्तते तथापि तद्भिन्न-हस्तपादादिचेष्टाया एव स्पन्दनपदेन विवक्षणात् दर्शनादौ तदभावात् दृशधात्वर्थः भाव एव।

भावक्रिये इत्युभेऽपि द्विविधे। कर्तृस्थभावकः-कर्मस्थभावकः, कर्तृस्थक्रियकः-कर्मस्थक्रियकश्चेति। कर्तृस्थो भावो येषां ते कर्तृस्थभावकाः। कर्तृस्था क्रिया येषां ते कर्तृस्थक्रियकाः। यत्र कर्मणि क्रियाकृतो विशेषः-वैलक्षण्यं दृश्यते-प्रत्यक्षमुपलभ्यते सः धातुः कर्मस्थक्रियकः। यत्र क्रियाकृतः विशेषः कर्मणि नावलोक्यते किन्तु कर्तरि सः धातुः कर्तृस्थक्रियकः। यद्वा यद्धातुवाच्यकृतः कश्चन विशेषः तत्क्रियाकर्मणि उपलभ्यते सः धातुः कर्मस्थक्रियकः। यद्धातुवाच्य-क्रियाकृतः विशेषः कश्चिदपि तत्क्रियाकर्मणि नोपलभ्यते सः धातुः कर्तृस्थक्रियकः। एवं यत्र कर्मणि भावकृतं वैलक्षण्यमवलोक्यते सः कर्मस्थभावकः धातुः। यत्र च भावकृतो विशेषः कर्मणि नावलोक्यते सः धातुः कर्तृस्थभावक इत्यभिधीयते।

सौकर्यातिशयद्योतनाय कर्तृगतव्यापारम् अविवक्षित्वा कर्मादि-कारकान्तर्गतव्यापारः यदा विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्त इति काचिद्व्यवस्था शास्त्रे उपदर्शिता, येन कर्मकर्तृप्रयोगः सिध्यति। तत्र कर्मणः कर्तृत्वविवक्षायां पूर्वं सकर्मका अपि धातवः अकर्मका भवन्तीति तेभ्यः भावे-कर्तरि च लकारः। तत्र कर्तरि लकारे कर्तुः कर्मवद्भावः प्रोच्यते कर्मवत्कर्मणा इत्यादिसूत्रेण। कर्मस्थभावकाः, कर्मस्थक्रियकाश्च धातवः उदाहरणत्वेनात्र द्रष्टव्याः। तथा हि कर्मवत्कर्मणा इत्यादि सूत्रे **तथा कर्मस्थभावकानां**

*Guest Lecturer, Dept. Of Vyakarana, Karnataka Sanskrit Univercity, PMK Road, Chamarajpet Bengaluru -18

**कर्मस्थक्रियकाणाञ्च** इति वार्तिककारः। कर्मस्थभावकानां, कर्मस्थक्रियाणाञ्च कर्ता कर्मवद्भवतीति तत्रे समुपावर्णि भाष्यकृता[12]।

तण्डुलः पच्यते, भिद्यते काष्ठम्, घटः क्रियते स्वयमेवेति कर्मस्थक्रियकाणामुदाहृतयः। तण्डुलः पच्यते, भिद्यते काष्ठमित्यत्र कर्मणोः तण्डुलकाष्ठयोः दृश्यते किञ्चित्क्रियाकृतं वैशिष्ट्यम्। यथा अपक्वतण्डुलापेक्षया पक्वतण्डुले मृदुत्वम्, अच्छिन्नकाष्ठापेक्षया छिन्नकाष्ठे लघुत्वम्। अतो द्वेतोः पच्यादयः कर्मस्थक्रियका इत्यभिधीयन्ते। ततश्च तण्डुलं पचतीत्यत्र तण्डुलरूपकर्मणः कर्तृत्वेन विवक्षायां धातोरकर्मकत्वात् कर्तरि लकारे, कर्तुः तण्डुलस्य कर्मवद्भावस्यातिदेशेन यगात्मनेपदयोः कृतयोः तण्डुलः पच्यते इति रूपम्। कृञः यत्नार्थकत्वमिति नैयायिका ऊचुः। परं **कृञोऽकर्मकतापत्तेः नहि यत्नोऽर्थं** इत्येतत् इति कथनपुरःसरं यत्नार्थकत्वं तस्य निरस्य उत्पत्तिरूपमर्थमाहुः शाब्दिकाः। तेन घटः क्रियते इत्यत्र घटरूपकर्मणि उत्पन्नानुत्पन्नकृतवैलक्षण्यस्य स्पष्टं प्रतीतेः कर्मस्थक्रियावाचकत्वं कृञः पर्यवस्यति तेन कर्मवद्भावेन यगात्मनेपदे प्रवर्तेते।

कर्मस्थभावको यथा - आसयति देवदत्तं यज्ञदत्तः, शाययति देवदत्तम्, स्थापयति देवदत्तमित्यादौ आसनशयनादिक्रियया देवदत्तरूपकर्मणि क्रियाकृतविशेषाणां शरीरावयवानां प्रसारण-आकुञ्चनादीनां(सन्निकृष्टदेशसंयोगानुकूला क्रिया) प्रत्यक्षत्वात् प्रयोजककर्तरि यज्ञदत्ते परिस्पन्दादीनाम् अदर्शनात् ण्यन्तानाम् आसयत्यादीनां कर्मस्थभावकत्वम्। ततश्च कर्मकर्तरि देवदत्तः आस्यते, देवदत्तः शय्यते(ण्यन्तात्) इति रूपे। कर्मस्थभावकानां शुद्धाः धातवः नोपलभ्यन्ते।

कर्तृस्थक्रियका यथा - गच्छति, धावति, हसति, हस्तिनं आरोहति। धावन-गमन-आरोहणादि क्रियाकृतवैलक्षण्यस्य कर्मण्यदर्शनात्, परिस्पन्दादेः कर्तर्यवलोकनात् इमे कर्तृस्थक्रियका धातवः इति परिगण्यन्ते। चिन्तयति-मन्त्रयते-अधिगच्छति-पश्यतीत्यादयः कर्तृस्थभावकाः धातवः। पश्यत्यादौ क्रियाकृतविशेषस्य घटादि-कर्मस्वनवलोकनात्। अपि च कर्तरि हर्षचिन्तादि-लक्षणविशेषदर्शनेऽपि चेष्टादिपरिस्पन्दादेरदर्शनात् चिन्तीत्यादीनां कर्मस्थभावकत्वम्।

इमे कर्तृस्थभावकाः, कर्तृस्थक्रियकाश्च धातवः णेरणौ यत्कर्म णौ चेत् इत्यात्मनेपदविधायकसूत्रे उदाह्रियन्ते। आध्यानभिन्नेऽर्थे वर्तमानात् ण्यन्तादात्मनेपदं स्यात्, अणौ या क्रिया सैव ण्यन्तेनोच्येत, अणौ यत्कर्मकारकं स णौ कर्ता चेत् इति सूत्रार्थः। सूत्रेऽस्मिन् कक्षाचतुष्टयम् वर्तते।

तथा हि प्रथमसोपाने 'भक्ताः भवं पश्यन्ति' इति शुद्धधातोः सर्वसाधारणः प्रयोगः। अत्र चाक्षुषज्ञानविषयत्वापत्त्यनुकूलः व्यापारः, चाक्षुषज्ञानविषयत्वापत्तिः फलमिति तदाश्रययोः भक्त-भवशब्दयोः यथाक्रमं कर्तृत्व-कर्मत्वे। पूर्ववाक्येन 'भवः चाक्षुषज्ञानाश्रयो भवति, भक्ताः विशिष्टेन स्वप्रयत्नेन भवं चाक्षुषज्ञानाश्रयं कुर्वन्ति' इति प्रतीयते। यदा चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारं कर्तृगतमविवक्षित्वा चाक्षुषज्ञानविषयत्वापत्तिरेव दृशेरर्थ इति स्वीक्रियते तदा 'भवः पश्यति' इति प्रयोगः सम्भवति। द्वितीयसोपानमिदम्[14]। ततः पूर्वं परित्यक्तस्य भक्तानां व्यापारस्य भवप्रयोजकव्यापारवत्वेन विवक्षणम् अर्थात् स्वयं चाक्षुषज्ञानविषयभावमापद्यमानं भवं भक्ताः साहाय्याचरणेन प्रयोजयन्ति इति विवक्षायां हेतौ णिचि, 'भक्ताः भवं दर्शयन्ति' इति प्रयोगः तृतीयकक्षायाम्। पुनस्तत्र कर्तुः सौकर्यातिशयविवक्षया भक्तगतव्यापारस्य परित्यागे, भवगतव्यापारस्य प्राधान्यविवक्षायां तस्यैव धातुवाच्यत्वे 'दर्शयते भवः' इति वाक्यं निष्पद्यते। प्रकृते भक्ताः भवं पश्यन्तीति अण्यन्तकक्षायां कर्म भवः, स एव 'दर्शयते भवः' इति ण्यन्तावस्थायां (चतुर्थसोपाने) कर्ता सम्पन्नः। ण्यन्तः दृशधातुश्च अध्यानभिन्नार्थकः। तथा च दर्शयते भवः इत्यत्र ण्यन्तात् धातोरात्मनेपदं प्रकृतसूत्रेण जोघुष्यते।

हरिस्तावत् **लक्षणहेत्वोः क्रियायाः**[15], **यस्य च भावेन भावलक्षणम्**[16] इत्यादौ क्रिया-भावयोः अभेदव्यवहार इव प्रकृतेऽपि तयोः सपरिस्पन्दापरिस्पन्दकृतविशेषमुपेक्ष्य सर्वसाधारणतया कर्तृस्थभावक-कर्मस्थभावकश्चेति धातोः द्वैविध्यं प्रादर्शीत्। उक्तं हि तेन –

**विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।**
**क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥ इति।**[17]

यत्र धात्वभिव्यक्तवैशिष्ट्यं कर्तरि-कर्मणि उभयसाधारणतया उपलभ्यते सः धातुः कर्तृस्थभावक अथवा कर्तृस्थक्रियकः। यथा घटं पश्यतीत्यादौ दर्शनरूपं फलं कर्तरि, कर्मणि चेत्युभयत्रापि साधारणतयोपलभ्यते। अतः सः कर्तृस्थक्रियकः। यत्र तु कर्मण्येव फलस्याभिव्यक्तिः न तु कर्तरि स कर्मस्थक्रियकः। काष्ठं भिद्यते इति यथा। तत्र हि भेदनफलस्य न कदापि कर्तर्यवस्थितिः।

परमेवं निगदिते सति पच्यादीनां कर्मस्थभावकानामपि कर्तृस्थभावकत्वप्रसङ्गः, कर्मणीव कर्तर्यपि परिश्रमरूपविशेषदर्शनात्। तस्मात् द्वितीयः पक्षः समाश्रितः क्रियाव्यवस्था त्वन्वेषामिति। अर्थात् यत्र कर्तृकर्मसाधारणरूपं फलं शब्देन-धातुना प्रतिपाद्यते-प्रकाश्यते सः कर्तृस्थभावकः। यत्र कर्त्रवृत्तिकर्मस्थफलं सः कर्मस्थभावकः। पच्यादिषु कर्तरि श्रमादीनामुपलब्धावपि तस्य अभिधानगोचरत्वाभावात् न तेषां कर्तृस्थभावकत्वम्।

सन्दर्भग्रन्थसूची :

1. वाक्यपदीयम् (अम्बाकर्त्रीव्याख्यासहितं)।
2. कैयटोद्योतसहितं पातञ्जलमहाभाष्यम्।
3. न्यास-पदमञ्जरी सहिता काशिका।
4. शब्दरत्नसहिता मनोरमा।
5. लघुशब्देन्दुशेखरः।
6. निरुक्तम्।
7. सिद्धान्तकौमुदी।

---

सन्दर्भ :

1. सि. कौ., बालमनोरमा व्याख्या पृ.सं. ५८९
2. अ. सू. ३/१/२६
3. अ. सू. ६/४/५१
4. सि. कौ., भाग ३, पृ. सं. ५८९
5. निरु. १/१/१
6. निरु. व्या. १-१-१
7. अ. सू. १/३/६७
8. अ. सू. ३/१/८७
9. अ. सू.८/३/८७
10. म. भा. ८/३/८७
11. प्रदी. व्या. ८/३/८७
12. म. भा. ३/१/८७
13. वै. मतो. का. सं. ५
14. दृशेः कर्तृस्थभावकत्वात् कर्मस्थभावकत्वाभावात् कर्मवत्कर्मणा इति कर्मवद्भावाभावः, तेन यथात्मनेपदयोरभवनम्।
15. अ. सू. ३/२/१२६
16. अ. सू. २/३/३७
17. वा.प., सा. समु., ६६

Impact Factor : 6.125

ISSN : 2395 - 5104

# शब्दार्णव Shabdarnav

*International Peer Reviewed Referred Journal of Multidisciplinary Research*

Year 8 Vol. 15, Part-I January-June, 2022

Scientific Research
Educational Research
Technological Research
Literary Research
Behavioral Research

Editor in Chief
DR. RAMKESHWAR TIWARI

Executive Editors
DR. KUMAR MRITUNJAY RAKESH
MR. RAGHWENDRA PANDEY

Published by
SAMNVAY FOUNDATION
Mujaffarpur, Bihar

Shabdarnav : *An International Peer Reviewed Refereed Research Journal*| ISSN - 2395-5104
वर्ष–8, अंक–15, भाग–1, जनवरी–जून, 2022| Impact Factor : 6.125

# शब्दशास्त्रे भावपदार्थविवेचनम्

**Dr. P. R. Archana Karanth***

जगति विद्यमानानि चराचरवस्तूनि शब्दः अर्थश्चेति द्वेधा विभज्यन्ते। तत्र अर्थप्रपञ्चस्य यावती विस्तीर्णता तावत्येव शब्दप्रपञ्चस्यापि। एकमर्थं बोधयितुमनेकाः शब्दाः प्रयुज्यन्त इति शब्दानामेवाधिकतमत्वम्। ते च शब्दाः बहुभिः प्रकारैः पृथक् क्रियन्ते। सर्वादौ लौकिकाः – वैदिकाश्चेति शब्दस्य द्वयीगतिः। लोके भवाः अथवा विदिताः लौकिकाः, वेदे भवाः वैदिकाः। उक्तं हि भाष्ये – **"अथ शब्दानुशासनम्। केषां शब्दानाम्। लौकिकानां वैदिकानाञ्च"**[1] इति। पुनश्च रूढः – यौगिकः – योगरूढश्चेति त्रिविधः शब्दः। तत्र अवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेणार्थबोधकत्वं रूढत्वम्। रथन्तरमित्यादौ यथा। प्रकल्पितावयवशक्त्यैवार्थबोधकत्वं यौगिकत्वम्, पाचिका – पाठिकेत्यादौ। अवयवार्थसंवलितसमुदायशक्त्यार्थबोधकत्वं योगरूढत्वं, पङ्कजमित्यत्र। केचन अत्रैव 'यौगिकरूढ' इति तुरीयमपि शब्दमुररीकृत्य, मण्डपादीन् शब्दान् तत्रोदाहरन्ति। यत्र अवयवशक्त्या समुदायशक्त्या च विभिन्नार्थबोधकत्वं तद्यौगिकरूढम्। नानार्थकोऽयं शब्द इति विशेषः। मण्डपशब्दः मण्डं पिबतीति योगशक्त्या मण्डपानकर्तृबोधकः, प्रकरणविशेषे च रूढिशक्त्या गृहविशेषबोधकः। एवमेव अश्वगन्धादयः शब्दा अप्यत्रैव ऊह्याः।

पुनरपि शब्दाः कृदन्ताः, तद्धितान्ताः, समासाश्चेति त्रिविधाः। कारकः – औपगवः – अधिहरीति यथाक्रममुदाहरणानि। **"नामाख्यातोपसर्गनिपाताश्च"**[2] इति शब्दचातुर्विध्यं प्रादर्शि यास्केन निरुक्ताख्ये ग्रन्थे। नामपदेन सुबन्तस्य आख्यातपदेन तिङन्तस्य च ग्रहणम्। उपगृह्याख्यातं तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। उच्चावचेषु निपतन्तीति निपाताः इव, न, चिदित्यादयः। शब्दतत्त्वस्य पारमार्थिकत्वविचिकित्सायां परा, पश्यन्ती, मध्यमा, वैखरीति चतुर्विधाः शब्दाः समुपलभ्यन्ते। सत्स्वेवं शब्दवैविध्येषु प्रकृते भावाख्यः शब्दः अनुसन्धित्सितः, यश्च कृदन्तत्वेन यौगिकत्वेन च परिगण्यते।

वाक्यस्यैव निरंशस्य वाचकत्वेऽप्यखण्डवाक्यव्युत्पत्तौ पदव्युत्पत्तिः उपायत्वेन समाश्रितः वैयाकरणैः। पुनस्तत्र पदे प्रकृति – प्रत्यय – आगमादेशान् प्रकल्प्य, अन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्यययोरर्थविभागञ्चोपस्थाप्य शास्त्रममुं प्रवर्तयामासुः। प्रयुक्तानामिदमन्वाख्यानमित्यतः भगवान्पाणिनिः स्वदृष्टिपथे समायातानां शब्दानां निष्पत्तिप्रणयनाय अष्टाध्यायीनामकमपूर्वं ग्रन्थं जग्रन्थ। असंख्याकानां पदानां नियमारचनमत्यन्तं दुष्करमेव। अतः सः कञ्चनोपायं समाश्रयामास।

सर्वादौ वाक्यस्थानि पदानि बुद्ध्या प्रविभज्य, तत्र प्रकृतिप्रत्ययविभागञ्चोपकल्प्य तदनु सुबन्त – तिङन्तभेदेन पदानि विभक्तानि। पुनः धातु – प्रातिपदिकभेदेन प्रकृतिः, कृत् – तद्धित – समासान्त – तिङ् – सुप् – स्वार्थिकभेदेन प्रत्ययाः विभक्ताः। एतेषां विभागमात्रेण शब्दनिर्वचनं न समाप्तिमेति, किञ्च प्रकृतिमात्रात् प्रत्ययकथने न सर्वेषामभीष्टानां शब्दानां सिद्धिर्भवति। एवमेवैतादृशापोद्धारेण अनिष्टसाङ्कर्यदोषोऽपि समजायेत। तस्मात् विभक्तेभ्यः एभ्यः प्रकृतिप्रत्ययेभ्यः अर्थनिर्देशनपुरःसरं विधानक्रमः सुष्ठु संसाधितस्तेन। अर्थकथनपूर्वकं प्रकृतिप्रत्ययादीनां निर्देशे तेषु तेष्वर्थेषु ते ते शब्दाः साधनीत्यतः सर्वत्रादोषः।

पाणिनिनाष्टाध्याय्यामसंख्याकाः अर्थाः निर्दिष्टाः। यथा – कर्तृ, कर्म, करणम्, सम्प्रदानापादानमधिकरणानि, सम्बन्धः, अपत्यम्, समूहविकारादयः। तत्र केचन प्रकृतेरर्थाः, अपरे केचित् प्रत्ययार्थाः, अन्ये केचन उभयोरप्यर्थाः। उक्तेष्वर्थेषु भावपदार्थोऽप्यन्यतमत्वेन परिगृह्यते। भावपदार्थेऽस्ति किञ्चित् वैशिष्ट्यम्। अत्र 'भाव' इति समानानुपूर्वीमेवाश्रित्य अर्थत्रयं विभिन्नविधिविधानाय अनेकत्र स्थलेषु पाणिनिर्निजगाद। अष्टाध्याय्यामीदृशी रीतिः नान्यत्रावलोक्यते। यथा **"भावे"**[3] इति सूत्रेण भावेऽर्थे

*Guest Faculty, Dept. of Vyakarana, Karnataka Sanskrit University, PMK Road, Bengaluru 560018

धातुसामान्यात् घञ्प्रत्ययः विहितः। तत्र भावो नाम लिङ्गसंख्याद्यन्वयरूपः सिद्धस्वभावयुक्तः धात्वर्थः। शुद्धः धात्वर्थः धातुनैवोच्यते, तस्य सिद्धता-निष्पन्नता नाम यो धर्मः द्रव्यायमाणः तस्य घञादयः वाचकाः। अत्रार्थे **'कृदभिहितो भावः द्रव्यवत्प्रकाशते'**[4] इति भाष्यं गमकम्। **"लः कर्मणि च भावे चाकर्मकेभ्यः"**[5] इति लकारविधायके शास्त्रे साध्यरूपक्रियायाः अभिधायकः सः। तदुक्तं भाष्ये – **'धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते'** इति। कौमुद्यां दीक्षितैरप्यगादि **'भावो भावना उत्पादना क्रिया'**[6] इति। ततश्चेह सूत्रे भावशब्देन फल-व्यापारयोर्ग्रहणम्। **"तस्य भावस्त्वलौ"**[7] इति त्वतल्विधायके शास्त्रे प्रकृतिजन्यबोधे प्रकारीभूतस्य धर्मस्य बोधकः भावशब्दः। यथा गोत्वमित्यत्र त्वादिप्रत्ययानां या प्रकृतिः – गोशब्दः, तज्जन्यो यो बोधः – गोपदनिष्ठशक्त्या जायमानः गोत्वविशिष्टानां गोव्यक्तीनां बोधः, तत्र बोधे यः प्रकारः - योऽर्थः विशेषणतया भासते गोत्वमित्याख्या जातिः स एव भावः त्वादि प्रत्ययेनोच्यते। एवञ्चानुपूर्व्याः सर्वत्र एकत्वेऽपि अर्थस्तु विभिन्न एव।

तत्र सप्तविंशतिसूत्राणि भावपदघटितानि अष्टकेऽवलोक्यन्ते। तानि च –

**धात्वभिहितभावार्थपराणि सूत्राणि –**

- **उदुपधाद्भावादिकर्मणोरन्यतरस्याम्** १-२-२१ उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्। भावे – मुदितम्, मोदितम् साधुना। निष्ठायाः विकल्पेन कित्वप्रतिषेधविधायके अस्मिन्शासत्रे, उपात्तस्य भावशब्दस्य धात्वभिहितः साध्यावस्थापन्नः अर्थः, तयोरेवेति सूत्रेण निष्ठायाः भावकर्मणोर्विधानात्। तयोरेवेत्यादि सूत्रे लः कर्मणीति सूत्रस्थभावपदस्यानुवर्तनात् तस्य च अद्रव्यायमाणार्थकत्वात् प्रकृतेऽपि सैवार्थः।
- **भावकर्मणोः** १-३-१३ भावे कर्मणि च यः लः तस्य आत्मनेपदमित्यर्थः। भावे लः विधीयते लः कर्मणीति शास्त्रेण। ततो हेतोः इहोक्तः भावशब्दोऽपि पूर्वोक्तमेवार्थं निगदति।
- **यस्य च भावेन भावलक्षणम्** २-३-३७ यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। प्रकृतसूत्रोपात्तौ भावशब्दौ क्रियापरौ। क्रिया च साध्यस्वभावयुक्ता। अतः साध्यावस्थः अर्थः भावशब्दव्यपदेश्यः।
- **लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्** ३-१-२४ एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्। भावोऽत्र धात्वर्थः साध्यावस्थापन्नः। तद्गता गर्हा भावगर्हा।
- **चिण् भावकर्मणोः** ३-१-६६ भावकर्मवाचिनि तशब्दे परे च्लेः चिण् स्यात्। भावः साध्यक्रिया।
- **भुवो भावे** ३-१-१०७ भुवः भावे क्यप् स्यात्। भावः साध्यावस्थापन्नः अर्थः।
- **भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्** ३-४-१६ भावस्य लक्षणे गम्ये स्थादिभ्यः धातुभ्यः छन्दसि विषये तुमर्थे तोसुन्प्रत्ययो भवति। भावः साध्यस्वभावयुक्ता क्रिया।
- **लः कर्मणि च भावे चाकर्मकेभ्यः** ३-४-६९ लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः, अकर्मकेभ्यः भावे कर्तरि च। भावः धात्वर्थः।
- **स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च** ६-४-६२ उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। भावः धात्वर्थः।
- **विभाषा भावादिकर्मणोः** ७-२-१७ भावे आदिकर्मणि च आदितो धातोः विकल्पेन निष्ठायामिडागमो भवति। भावे – प्रस्वेदितं तेन। यद्यत्र नपुंसके भावे इति क्तः तर्हि सिद्धक्रिया। यदि निष्ठा इति क्तः तर्हि साध्यक्रिया।

**कृदभिहितभावार्थपराणि सूत्राणि -**

- **तुमर्थाच्च भाववचनात्** २-३-१५ भाववचनाश्च इति सूत्रेण यो विहितः तदन्तात् चतुर्थी स्यात्। यागाय यातीति यथा। अत्र भाववचनशब्देन भाववचनाश्चेति सूत्रं लक्ष्यते। तत्र भावे इत्यधिकृत्य

विहिताः घञादिप्रत्ययाः भाववचनशब्देन परिगृह्यन्ते। भावे इत्यधिकारसूत्रे भावः सिद्धावस्थापन्नः धात्वर्थः। ततश्च परम्परया अयमपि भावशब्दः तदर्थलक्ष्यकः।

- **रुजार्थानां भाववचनानामज्वरेः** २-३-५४ भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। सिद्धावस्थापन्नः अर्थः भावशब्दग्राह्यः। अभिहितश्च तत्त्वबोधिनीकारेण – "रुजार्थानां धातूनां भाववाचकत्वाव्यभिचारात् भावशब्देनाऽत्र घञादिवाच्यः सिद्धरूपः भाव उच्यत" इति।[8]
- **आशिते भुवः करणभावयोः** ३-२-४५ आशितशब्दे उपपदे भवतेः करण-भाव्योः अर्थयोः खच् स्यात्। भावे – आशितस्य भवनं आशितम्भवः। वाऽसरूपविधिना ल्युडपीत्युक्तत्वात्, ल्युडन्ततया(भवनं) विग्रहप्रदर्शनात् तस्य च सिद्धरूपार्थकत्वात् प्रकृतसूत्रेऽभिहितस्य भावशब्दस्यापि स एवार्थः।
- **भाववचनाश्च** ३-३-११
- **भावे** ३-३-१८
- **अभिविधौ भाव इनुण्** ३-३-४४
- **भावेऽनुपसर्गस्य** ३-३-७५
- **स्यागापापचो भावे** ३-३-९५
- **व्रजयजोर्भावे क्यप्** ३-३-९८
- **नपुंसके भावे क्तः** ३-३-११४ सूत्रसमकेऽपि भावशब्दः सिद्धवस्थापन्नार्थपरः।
- **श्रज्यावमकन्यापवत्सु भावे कर्मधारये** ६-२-२५ श्र-ज्य-अवम-कन् इत्येतेषु पापशब्दवति चोत्तरपदे कर्मधारयसमासे भाववाचि पूर्वपदं प्रकृतिस्वरं भवति। गमनश्रेष्ठम्। गमेः ल्युट् चेति सूत्रेण भावे ल्युट्। स च भावः सिद्धावस्थापन्नः धात्वर्थः।
- **अनो भावकर्मवचनः** ६-२-१५० अनप्रत्ययान्तमुत्तरपदं भाववचनं कर्मवचनञ्च कारकात्परमन्तोदात्तं स्यात्। पयः पानं सुखम्। पातेः कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् इत्यनेन भावेऽर्थे ल्युट्। भावः सिद्धक्रिया।
- **घञि च भावकरणयोः** ६-४-२७ भावकरणवाचिनि घञि परतो रञ्जेरुपधायाः नकारस्य लोपो भवति। भावार्थे घञ्विधीयते भावे इति सूत्रेण। ततो इह सूत्रेऽभिहितः भावः सिद्धावस्थापन्नार्थपरः।
- **वा भावकरणयोः** ८-४-१० पूर्वपदस्थान्निमित्तात्परः भावे करणार्थे च यः पानशब्दः तस्य उक्तविषये णो वा स्यात्। क्षीरपानम् – क्षीरपाणम्। पिबतेर्भावे ल्युट्। पानक्रियेत्यर्थः। सिद्धावस्थापन्नः धात्वर्थः भावः।

**तद्धिताभिहितभावार्थपराणि सूत्राणि -**

- **भावे च** ४-४-१४४ भावे चार्थे छन्दसि विषये शिवादिभ्यः तातिल्प्रत्ययो भवति। शिवस्य भावः शिवतातिः। भावः प्रवृतिनिमित्तपरः।
- **तस्य भावस्त्वतलौ** ५-१-११९ षष्ठ्यन्तात् भाव इत्यर्थे त्वतलौ स्तः। प्रकृतिजन्यबोधे प्रकारः भावः।
- **ये चाभाव-कर्मणोः** ६-४-१६८ यकारादौ च तद्धिते अभावकर्मणोः अन् प्रकृत्या स्यात्। अभावकर्मणो किम् – राज्ञः भावः कर्म वा राज्यम्। भावः प्रवृत्तिनिमित्तम्।

तत्र सूत्रत्रये एव अर्थविशेषः कथितः। अन्यत्र सूत्रेषु तानर्थाननूद्य कार्याणि विहितानीति विशेषः। किञ्च कानिचनसूत्राणि भावपदरहितान्यपि अनुवृत्यादिना तत्पदमाश्रित्य तदर्थे एव प्रवर्तन्ते। तानि यथा –

- षष्ठी चानादरे २-३-३८
- सार्वधातुके यक् ३-१-६७
- हनस्त च ३-१-१०८
- परिणाख्यायां सर्वेभ्यः ३-३२० इत्यारभ्य आक्रोशे नञ्यनिः इत्यावत्।
- ल्युट् च ३-३-११५

- कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् ३-३-११६
- तुमर्थे से-सेनसेऽसेन्.......... ३-४-९ इत्यारभ्य सृपितृदोः कसुन् ३-४-१७ इति सूत्रपर्यन्तं विद्यमानानि सूत्राणि।
- अलं-खल्वोः प्रतिषेधयोः प्राचां क्त्वा ३-४-२४ इत्यारभ्य पर्याप्तिवचनेष्वलमर्थेषु ३-४-६६ इति पर्यन्तमभिहितानि क्त्वा-णमुल्प्रत्ययविधायकानि शास्त्राणि।
- तयोरेव कृत्यक्तखलर्थाः ३-४-७०
- आदिकर्मणि क्तः कर्तरि च ३-४-७१
- गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ३-४-७२
- आ च त्वात् ५-१-१२० इत्यारभ्य ब्रह्मणस्त्वः ५-१-१३६ इत्यन्तसूत्राणि।

इत्थञ्च शास्त्रान्तरेऽपि विचर्चितश्चायं भावशब्दः अत्र शास्त्रे पारिभाषिकं, विभिन्नमर्थत्रयं समुपस्थापयतीति विशेषः। ते चार्थाः सूत्राणामुल्लेखनपुरःसरं संक्षेपेणेहोपदर्शिताः।

**ग्रन्थसूची :**

1. पाणिनीयः अष्टाध्यायी सूत्रपाठः, पूर्वपीठिका-सूत्रविवरणात्मक 'प्रहलाद' टिप्पणीसहितः, चौखम्वा कृष्णदास अकाडमी।
2. आचार्यभर्तृहरिप्रणीतम् वाक्यपदीयम्, व्याख्याद्वयोपेतम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः।
3. श्रीमन्महर्षिपतञ्जलिविनिर्मितं व्याकरणमहाभाष्यम्, भाष्यप्रदीपोद्योतसमुलसितम्, चौखम्वा संस्कृत प्रतिष्ठानम् 2007
4. काशिकावृत्तिः, न्यास-पदमञ्जरी व्याख्याभ्यां सहिता, संपादकौ स्वामी द्वारिकादासः शास्त्री, पं. श्रीकालिकाप्रसादशुक्लः, प्रकाशनम् – प्राच्यभारती १९६५
5. भट्टोजिदीक्षितविरचिता सिद्धान्तकौमुदी (वालमनोरमा-तत्त्वबोधिनी व्याख्याभ्यां समन्विता) मोतीलाल् बनारसीदास।
6. महामहोपाध्यायनागेशभट्टविरचितः परमलघुमञ्जूषा, किरणावली व्याख्योपेता, चौखम्वा संस्कृत प्रतिष्ठानम्।
7. श्रीमत्कौण्डभट्टविरचितः वैयाकरणभूषणसारः, प्रभा-दर्पणव्याख्याद्वयोपेतः, चौखम्वा संस्कृत प्रतिष्ठानम्।
8. नागेशभावप्रकाशसहिता लघुमञ्जूषा, व्याख्या – पेरी सूर्यनारायणशास्त्री।

**सन्दर्भ :**

1. महाभाष्यम्, पस्पशाह्निकम्
2. निरुक्तम् १/१/१
3. अ.सू. ३/३/१८
4. म. भा. ३/१/६७
5. अ. सू. ३/४/६९
6. सि. कौ. भावकर्मतिङ्प्रकरणम्।
7. अ. सू. ५/१/११९
8. तत्त्वबोधिनी २/३/५४